बृहज्जातक सटीक

बृ॰जा॰टी॰
०२

श्रीगणेशायनमः श्रीगणेशं नृसिंहञ्च शारदां गुरुपङ्कजम्॥ नत्वा संक्षेपतो वच्मि बृहज्जातकटिप्पणीं शिष्या
चारपालनायेष्टग्रंथाविघ्नसमाप्त्यैचावन्तिकाचार्यो वराहमिहरोऽर्कलब्धवरोगणितस्कन्धानन्तरं होराग्र
न्थं चिकीर्षुरर्कोद्याशिर्षं शार्दूलविक्रीडितेनाह मूर्तित्वे इति नानाकरस्त्रैलोक्यप्रकाशको रविर्नोऽस्म
भ्यं वाणीं ददातु सः कः यः शशभृतश्चन्द्रस्य मूर्तित्वे शरीरत्वे परिकल्पितः यतो जलमयश्चन्द्रः प्रकाशही
नस्तत्र रविकराः प्रतिफलिता ज्योत्स्ना भवन्तीत्युक्तं सलिलमये शशिनि रवेर्दीधितयो मूर्छितास्तमो
नैशं क्षपयंति दर्पणोदरनिहिता इव मंदिरस्यांतः इति। यो मोक्षमार्गिणां वर्त्म मार्गभूतः मोक्षभा
जो रविं भित्त्वा गच्छन्ति। आत्मविदाम्योगिनामात्मा तेजोरूपो हृदयान्तस्थः तथाच श्रुतिः सूर्य आ
त्मा जगतस्तस्थुषश्चेति यजतां क्रतुर्यज्ञः उक्तंच अग्नौ प्रास्ताहुतिः। सम्यगादित्यमुपतिष्ठते इति
तथा अमराः देवाः ज्योतींषि नक्षत्राणि तेषां भर्ता प्रभुः। ग्रहनक्षत्राणां तद्वशेन नित्यमुदया
स्तमयो नुक्रमः। तेजसो गोलकः सूर्यो ग्रहर्क्षाणाम्बु गोलकः। प्रभावंतो हि दृश्यंते सूर्य रश्मि
दीपिता इति। लोकानां विनाशे उत्पत्तौ पालने च प्रभुः चोवधारणे अनेकधा यः श्रुतो पठ्यते त
था च श्रुतिः एकं सद्विप्रा बहुधा वदन्ति। अथान्यशास्त्रेभ्यो स्य गुणबलं शार्दूलविक्रीडितेनाह॥

॥२॥

राम॰
२

भूयोभिरितिति बहुभिः प्राज्ञैः पटुधियां चतुरबुद्धीनां होराप्राक्तनकर्म्मपाकफलं फलत्तापनाय शब्दवृत्तिषु तेषु
शास्त्रेषु बहुकृतेष्वपि होराशास्त्रसमुद्रतरणे भग्नोद्यमानां अर्थ्ये शास्त्रलक्षणं प्लवमल्पमारभेऽहं
इति किंभूतं स्वल्पम् वृत्तैर्विचित्रं अर्थेन बहुलं तस्मादुद्यमभंगो नास्तीति तेषां तात्पर्यम् २
शास्त्रस्य प्राक्तनकर्म्मव्यञ्जकत्वमिन्दुवज्रयाह होरेति अहोरात्रशब्दस्य पूर्वापरवर्णलोपात् अहो
रात्रविकल्पनां होरां एके इच्छन्ति मेषादयो होरान्तर्भूताः लग्नस्य च शुभाशुभज्ञानं तच्च होरान्त
र्भूतं तस्मात् होरान्तर्भूतत्वात् लग्नस्य होरा इति कल्पनत्वं प्रयोजनमाह प्राग्जन्मनिबद्धसञ्चि
तकर्म्मणः पाकं होरा प्रकटीकरोतीति ३ व्यवहारार्थकालस्याङ्गानि मेषादीन् शार्दूलविक्रीडिते
नाह कालाङ्गानीति मेषप्रथमराशयो नवभिर्नक्षत्रपादैः प्रमाणं येषान्ते अश्विप्रथमा अ
श्विनीप्रभृतिनवनक्षत्रपादा एकैकस्य मानम् मेषप्रथमा राशयो ऽश्विप्रमुखैर्भैर्युक्ता इत्य
र्थः तादृशाः कालस्य धातुरवयवाः तानि यथा शिरः १ मुखम् २ वक्ष ३ हृत् ४ उदरं ५ कटिः ६
नाभिः ७ लिङ्गं ८ ऊरू ९ जानुनी १० जङ्घे ११ पादौ १२ चकारास्थिताः एभिः क्षेत्रं गृहं ऋक्षं
भानि भवनं एते एकमर्थं संप्रतिपान्ति पर्यायाद्रस्यार्थः ४ राशीनां स्वरूपन्वसन्ततिलकेनाह मत्स्यौ

र·जा·टी·
०२

विति मीनौ मत्स्यौ अन्योन्यपुच्छाभिमुखं मत्स्यद्वयं घटीस्कन्धः सकरिः कर्कटः पुमान् कुंभः नौस्थि-
नस्त्रीपुंसौ यो मिथुनराशिः पुमान् सगदः स्त्री सवीणा। अथ जघनेन अश्वतुष्यात्। धनुर्धरो नरो धनुः म-
गमुखो मकरः तुलाधरो नाम तुलाराशिः धान्याग्निकरा नौस्था कुमारी कन्याराशिः शेषाः मेषवृषसिं-
हवृश्चिककर्काः स्वनामवेदिता रूतयः सर्वे राशयः स्वचरास्वस्वस्थानेषु चरंति। तथा च मेषवृषौ गि-
रीवनचरौ रात्रौ ग्राम्यौ मिथुने ग्राम्यः कर्कोम्बुचरः सिंहो वनचरः तस्याग्निदेशगा कन्या तुला
आपणस्थाः वृश्चिको गर्तवासी धन्वी ग्राम्यः मकरपूर्वभागो ग्राम्यो ऽन्यजलचरः कुंभो ग्राम्यो मी-
नो जलचरः ५ राशीनवांशद्वादशांशाधिपानकुं रेनाह त्रितिजेति कुजादयो ग्रहाणां राशी-
नां मेषादीनां अंशानां च पतयः नवांशानाह अजेति मेषाद्या मेषस्य नवांशाः मकराद्या वृषस्य।।
तुलाद्या मिथुनस्य चंद्रभवनकर्कस्त्वाद्याः कर्कस्य एवं सिंहादीनां चतुर्णां क्रमान्मेषमगतु-
ला कर्कटाद्याः पुनर्धनुराशीनां तद्वत्। द्वादशांशानाह। भवनसमांशा द्वादशांशास्तत्पत-
यः स्वगृहादेव द्वादश क्रमेण ज्ञेयाः ६ त्रिंशांशानुष्पितानाह।। कुजेति अयुजि विषमराशौ
पवनाः पञ्चांते नाहिताः पञ्चानां कुजः पतिः समीरणाः पञ्चततः पञ्चानां शनिः कोर्प्पिर्विश्विकोष्टमः

एम
०२

तेनान्तोष्टानांजीवः। एकस्तुलासप्तमस्थेन ततः। सप्तानाम्बुधः लेयः सिंहः पञ्चमस्थेन ततः पञ्चा
नांभृगुः एवंत्रिंशत। एजितसमएशोनेगस्हा। विपरीता; भागाश्चतेनाद्दितः पञ्चानांभृगुः ततः सप्ता
नांबुधः ततोष्टोगुरोः ततः पंचशनेः ततः पञ्चकुजस्येति शशीति कर्कालिमीनानांनवमांनव
मांशाः अक्षसन्धिसञ्ज्ञः प्रयोजनम् संधोपापेशशिनिचजन्म इत्यादि ७ मेषादिसञ्ज्ञा आर्ष्यपाह
क्रियेति क्रियोमेषः तावुरिः वृषः जितुमं मिथुनं कुलीरः कर्कः लेयः सिंहः पाथोनः कन्या जूकस्तु
ला कौर्पिर्वृश्चिकः तोक्षिकोधनुः आकोकेरो मकरः हृद्रोगः कुंभः अन्त्यभं मीनः इत्थं राशीना
न्सञ्ज्ञा षड्वर्गमित्रवज्रपाह द्रेष्काणेति द्रेष्काणादयः षट्पदार्थाः षड्वर्गसञ्ज्ञा। द्रेष्काणोराशि
त्रिभागः। होरारश्यर्द्धं लवभागोनवांशः ३ त्रिंशांशत्रिंशोभागः ४ द्वादशांशश्च ५ यस्य ग्रह
स्य यत्क्षेत्रं राशिः सतस्यवर्गः आदिभ स्वेषु स्थितः स्ववर्गस्थ एवं परवर्गोपि लग्नं नरईहोरेति
ज्ञेयम् ८ संज्ञान्तरं वसन्ततिलकेनाह गोजेति वृषमेषधनुर्मिथुनः कर्कमकरा रात्रिबल
सञ्ज्ञाः मिथुनरहिता स्तएव पृष्ठोदयाः पृष्ठेनोदयंतीत्यर्थः शेषाः सिंहकन्यातुलालिकुंभा
मिथुनश्च शीर्षोदयाः शिरसोदयंति। कुंभोद्दिनबलाश्चमीनं तूभयतः पृष्ठशीर्षाभ्यामुद्गच्छतिपृथुनो

मयुग्मः मीनः १० क्रूरादिसञ्ज्ञामन्दाक्रान्तयाह। क्रूर इति। मेषादयो विषमाः क्रूरा नराश्च वृषादयः स
माः सौम्या नार्यश्च तथा मेषादयः क्रमात् चरद्विस्वभावसञ्ज्ञा एवं कर्कादयस्तुलादयो मकराद
यश्च प्रागादिशा इति मेषवृषमिथुनकर्काः स्वस्वत्रिकोणयुताः प्रागादीश्वराः तेन मेषसिंहध
न्विनः पूर्वेशाः वृषकन्यामकरा दक्षिणेशाः मिथुनतुलाकुंभाः पश्चिमेशाः कर्कालिमीना उत्तरे
शाः विषमराशौ सूर्यस्य होरा समराशौ चंद्रसूर्ययोः राशीनामाद्यः द्रेष्काणः स्वेशस्य द्वितीयः
पंचमाधिपतेः तृतीयो नवमाधिपेः ११ होराद्रेष्काणयोर्मतांतरमिन्द्रवज्रयाह केचिदिति स्वेशा
लाभेशयो होरे वदन्ति केचित्स्वेशद्वादशेशलाभेशानां द्रेष्काणकानांश्च वदन्ति १२ ग्रहाणामु
च्चनीचानि पुष्पितागयाह अजेति मेषवृषमकरकन्याकर्कमीनतुलानां दश चतुर्दश युग्मं
पंचदश पंच सप्तविंशति विंशत्यंशेषु रव्यादयः क्रमात्परमोच्चाः उच्चस्थानात्सप्तमराशीनां द
शांशेषु परमनीचाः १३ ग्रहाणां वर्गोत्तममूलत्रिकोणानि वसन्ततिलकेनाह वर्गेति चरा
णां प्रथमो नवांशः स्थिराणां पंचमो द्विस्वभावानां नवमः वर्गोत्तमसञ्ज्ञः सप्तभृशायी सिंहवृषमेष
षकन्याधनुस्तुलाकुंभाख्याराशीनां मूलत्रिकोणानि १४ लग्नादीनां सञ्ज्ञा वसन्ततिलकयैवाह होरेत्यः

तनु १ कुटुम्ब २ भ्राता ३ बंधु ४ पुत्र ५ शत्रु ६ पत्नी ७ मृति ८ धर्म ९ आस्पदं १० लाभः ११ रिःफं १२ लग्नादिनामा
नि षष्ठदशमैकादशतृतीयान्युपचयाख्यानि एके उपचयत्वमेषां नव द्वन्तिनित्यमितिवदन्ति पापैः
स्वामिशत्रुरणांचदृष्टेनोपचयत्वमितिभावः १५ लग्नादीनांनामान्तराणिव्यवहारायवसन्तति
लकयाह कल्येति कल्यं १ स्वं २ विक्रमः ३ गृहं ४ प्रतिभा ५ क्षतं ६ चित्तोत्थं ७ रंध्रं ८ गुरुः ९ मानं १०
भवं ११ व्ययं १२ लग्नादिनामानिलग्नाच्चतुर्थाष्टमेचतुरस्राख्ये सप्तमं द्यूनं दशमं खं आज्ञा च
१६ केन्द्राणिनस्याराशिवलंचशोधकेनाह कंटकेति लग्नाच्चतुर्थसप्तमदशमानांकंटकंकेन्द्रंच
तुष्टयेतिसंज्ञात्रयम् कीटोवृश्चिकः सप्तमस्थोवली १ मिथुनकन्यातुलाधनुः पूर्वार्द्धकुंभान्न
राशयस्तेलग्नस्थावलिनः कर्कमीनमकरार्द्धजलचरास्तेचतुर्थेवलिनः १७ अन्यसंज्ञावस
न्ततिलकेनाह केन्द्रादिति केन्द्रात्परेषांद्वितीयपंचमाष्टमैकादशानां पणफरसंज्ञातत्परेषां
तृतीयषष्ठनवमद्वादशानां मापोक्लिमसंज्ञा हिबुकाम्बुसुखवेश्मबंधुसंज्ञाश्चतुर्थस्य अस्तजा
मित्रेसप्तमस्य द्यूनभंपंचमस्य त्रिकोणंपंचमनवमस्यमेषूरणाज्ञेकर्मचदशमस्य १८ होरादीनां
बलेशार्द्दूलविक्रीडितेनाह होरेति स्वस्वामिगुरुज्ञैर्युतादृष्टावाहोरादिबलवती अन्यैरबला १ उभयैर्मध्य

बलाकेन्द्रादिस्थाश्चत्वारो विशेषतो बोध्याः केन्द्रस्थाः सर्वे शपोबलिनः पणफरगा मध्यबलाः आपोक्लिमगा हीनबलाः अत्र केचित् केन्द्रादिस्था द्विपदादयो बलिनः इति व्याचक्षते तदयुक्तम् वादरायणोक्तिविरोधित्वात् तथाच तद्वाक्यं केन्द्रस्था अतिबला मध्यबला पणफरे स्थिता ज्ञेयाः आपोक्लिमगाः सर्वे हीनबला राशयः कथिता इत्युक्ते इति अन्ये निशि च संध्याद्वये च क्रमात् द्विपदाश्चतुष्पदा कीटाश्चोक्ता इत्यनुवर्तते दिने द्विपदाः निशि चतुष्पदाः संध्ययोः कीटाः कीटश्चात्र स्वाप्यपलक्षकः एवं ईइति विषयादयः पञ्चादयः ५ ६ ७ ८ ९ १० एते चतुर्गुणाः २० २४ २८ ३२ ३६ ४० एतन्नोघाद्विषट्कस्य मानं व्यत्यया तुलादिमानं इदं न घटितं तद्योनएव वयनुनानाप उत्तिव्यस्त्रहजेत्तु तोपस्यतनत्रिंशत्त्रिकोणनवमस्य ९ राशिवर्णानाह रक्त इति मेषो रक्तः वृषः सितः मिथुनो हरिद्वर्णः कर्क ईषद्रक्तः सिंहः ईषच्छुक्लः कन्या नानावर्णा तुला कृष्णः वृश्चिकः पीतः धनुः कपिलः मकरः कर्बुरः कुंभः कपिलः मीनः स्वच्छवर्णः शबलः स्वामिनां यादृक्तनवस्वर्णराशीनां प्लवत्वं ज्ञेयं तथाहि मेषवृश्चिकौ दक्षिणप्लवौ वृषतुले आग्नेयप्लवे मिथुनकन्ये उत्तरप्लवे कर्कटो वायवीप्लवः सिंहः पूर्वप्लवः धनमीनावीशानप्लवावित्ति मकरकुंभौ पश्चिमप्लवौ ह्यतनष्टादिप्रश्ने चौरादेः दिग्गमन प्रयोजनं एवं

रविराशेर्द्वितीयभवनं वेशिसंज्ञं तथा आद्यं शुभं ॥२०॥ इति श्रीमहीधरकृतौ लघुजातके विवृतौ प्रथ-
मोऽध्यायः ॥१॥ ॥ कालात्मेत्यादि नाराशीनां कालांगत्वेनोक्तेः चराचरं जगद्ग्रहमयमेव । ग्रहाणां
राशीशत्वात् तस्मात्साहीन् भागान् राजादींश्च विश्वपालकान् ग्रहरूपानेवाह कालात्मेति कालस्य
आत्मा रविः चंद्रो मनः कुजः शौर्यं बुधो वाक् गुरुर्ज्ञानं सुखं भृगुः कामः शनिर्दुःखं एवं तथैव लं काला-
वयवा मेषाद्याः ग्रहा अपि तस्मात्स्मात् बलवत्सर्वे: प्रयोजनं ये पीडिते ग्रहे देहि नत्तदंगपीडनं पुष्टे पुष्टिः श-
नैर्वैपरीत्यं किंच रविचंद्रौ नृपौ कुजः सेनापतिः बुधो युवराजः गुरुभृगू मंत्रिणौ शनिर्दासः प्रयोजन
जन्मनि बलिनो यस्य स कार्यसाधकोऽन्यथा हानिकरः १ ग्रहसंज्ञा शालिनी वसन्ततिलकाभ्या-
माह हेलिरिति हेलिरिति सूर्यनाम शीतरश्मिरिति चंद्रस्य हेम्नः वित्तज्ञः बोधनः चंद्रजः एतानि बु-
धस्य आरः वक्रः क्रूरदृक् आवनेयः एतानि भौमस्य कोणः मंदः सूर्यपुत्रः असितः इति शनेः २
अन्येषां संज्ञा वसन्ततिलकयाह जीवेति जीवः अंगिराः सुरगुरुः वाक्पतिः ईड्यः एतानि गुरोः
भृगुः भृगुजः सितः आस्फुजित् एतानि भृगोः तमः अगुः असुरः एतानि राहोः शिखीति केतोः अ-
न्येपर्यायाः लोकतो बोध्याः ३ ग्रहवर्णानाह रक्त इति रक्तश्यामो सौम्यामप्युपाटलवर्णो रविः श्वेतश्चन्द्रः ना

निशिर्द्वौ रक्तगौरः रक्तपीतश्याममिश्रो वर्णः भौमः हरिद्वर्णो बुधः गौरो गुरुः शुक्र ईषद्गौरः कृष्णः शनिः प्रयो
जनं सर्वग्रहेषु यो बलवान् तद्वर्णो नाम स्यात् ४ ग्रहाणां वर्णान् यथा ह्युक्तेनाह वर्णा इति ताम्रादयो वर्णाः
सूर्यादिनाथाः सूर्यादयो नाथाः येषां ते ताम्रवर्णस्य रविर्नाथः सितस्य चन्द्रः अतिरक्तस्य कुजः हरिद्व
र्णस्य बुधः पीतस्य गुरुः चित्रस्य शुक्रः कृष्णस्य शनिः बलवद्ग्रहे सवर्णद्रव्यलाभो ग्रहस्य प्रयोजनम्
वन्ह्यादयो रव्यादीनां नाथाः रवेरग्निर्नाथः चंद्रस्य जलं भौमस्य षण्मुखः बुधस्य हरिः गुरोः इन्द्रः
शुक्रस्य इन्द्राणी शनेः प्रजापतिः इदं पूजार्थम् प्रागादिदिशां रव्यादयो नाथाः रविः प्राच्यः शुक्र आग्ने
याः कुजो दाक्षिणात्याः राहुर्नैर्ऋत्याः शनिः पश्चिमायां चंद्रो वायव्याः बुध उदीच्याः गुरुरैशान्याः
क्षीणचन्द्ररविकुजशनयः पापास्तद्युतो बुधश्च शेषाः सौम्याः कृष्णाष्टम्यादितः शुक्लाष्टम्यंतं या
वत्क्षीणचन्द्रः ५ ग्रहाणां स्त्रीत्वादिलिंगत्वं चाप्रतीत[illegible] मृतपतित्वं चोपच्छन्दसिकेनाह बुध
नि बुधशनी क्लीबौ शशिभृगू स्त्रियौ रविकुजजीवाः नराः कुजेऽग्नेः स्वामी भुवो बुधः नभसो
जीवः जलस्य शुक्रः वायोः शनिः रविचन्द्रौ वन्हेर्बुधो इति इत्यर्थनुक्रमम् ६ वर्णाधिपत्वं गुणवि
भागत्वं चोपजात्याह विप्रेति शुक्रगुरू विप्रपती कुजरवी क्षत्रपती शशी विट्पती बुधः शूद्रपतिः शनि एम

रन्त्यजपतिः एषामुपघाते तद्वर्णोपघातः चंद्रार्कगुरवः सत्वंबुधभृग्वोरजः कुजशनी तमः अथोजनं
त्रिंशांशे यस्य भास्कर[illegible] इति ७ चंद्रार्कयोः रूपं तोटकेनाह मध्विति मधुनिभनेत्रः प्रसारितभुजस्तु
यः पित्ताधिको विरलकेशो रविः कृशवर्तुलांगः वातकफाधिकः मेधावी कोमलवाक् सुन्दरेक्षण
श्चंद्रः ८ अथ कुजबुधयोरूपं स्वागतयाह क्रूरेति क्रूरनेत्रो युवा ह्युदारमतिः पित्ताधिकोऽस्थिरचित्तस्त
नूदरः कुजः गद्गदभाषी हास्यशीलो दोषत्रयोल्वणस्वभावो बुधः ९ जीवभृग्वो रूपं वंशस्थेनाह
वृहदिति स्थूलाङ्गः पिंगलकेशनेत्रो धार्मिकमतिः कफाधिको गुरुः सुखी सुन्दराङ्गः सुनेत्रः कफ
वायुप्रकृतिः कृष्णकुंचितकेशः भृगुः १० शनिरूपं ग्रहाणां धातूंश्च वसन्ततिलकेनाह मंदइ
ति कार्श्यापङ्गुः पीतनेत्रो दुर्बलो दीर्घदेहो दीर्घदन्तो रूक्षतनूरुहकेशो वाताधिकः शनिः धातूनाह श
निः स्नायुः रविरस्थि निरुधिरं चन्द्रः त्वग्बुधः रेतः भृगुः मेदो गुरुः मज्जा कुजः ११ स्थानवस्त्र
प्रभुत्वं शार्दूलेनाह देवेति अर्कादीनां क्रमात् देवादिस्थानानि देवस्थानं रवेः जलस्थानमिन्दोः
अग्निस्थानं कुजस्य क्रीडास्थानं बुधस्य भांडारं गुरोः शयनस्थानं भृगोः अवकरस्थानं शनेः
बलवति ग्रहे स्वस्थाने प्रसवो ज्ञेयः हृतनष्टादेश्चौरस्थाने वक्तव्यम् स्थूलवासो रवेः नवमिन्दोः

ष.ज्ञा.टी.
६

अग्निदग्धं कुजस्य जलक्लिन्नं बुधस्य नातिजीर्णं गुरोः दृढं शुक्रस्य जीर्णं शनेः सूतिकावस्त्रज्ञानम् प्रयो-
जनं ताम्रं रवेः मणिश्चन्द्रेः हेमं भौमस्य कांस्यं बुधस्य रौप्यं गुरोः मुक्ताः शुक्रस्य लोहं शनेः सूतिका-
गारे बलवत्क्रूरदृश्यमसत्वे हृतनष्टद्रव्यज्ञाने च प्रयोजनम् शनिशुक्रकुजचन्द्रबुधगुरुषु लग्ने पश्चि-
शिरोदयोऽस्तगो ज्ञेयाः बहुषु बलवत्तः ग्रहाभावे लग्नद्रेष्काणेशो ग्राह्यः नष्टजातके हृतनष्टचि-
न्तायां प्रयोजनम् १२ ग्रहदृष्टिं ग्रहविशेषमाह ।त्रिदशेति यत्र स्थाने ग्रहाः स्थिताः ततस्तृतीयदशम
स्थाने पादद्दृष्ट्या पश्यति शनिः पूर्णं नवमे पंचमे ऽर्द्धदृष्ट्या गुरुः पूर्णां अष्टमचतुर्थे पादोनमपरे
कुजः पूर्णं परेऽर्के चंद्रबुधशुक्राः सप्तमं पूर्णं पश्यंति एवं फलान्यपि दद्यति १३ कालज्ञानं चैतानीपे
नाह अयनेति सूर्यादीनामयनादिककालनिर्देशः सूर्यादयनं चंद्रान्मुहूर्तः कुजाद्दिनं बुधादृतुः
गुरोर्मासः शुक्रात्पक्षः शनेर्वर्षं प्रयोजनं प्रश्नलग्ने यस्य नवांशः तस्य कालः शुभाशुभे फले वा
च्याः रवेः कटुरसः चंद्रस्य लवणः कुजस्य तिक्तः बुधस्य मिश्रः गुरोर्मधुरः शुक्रस्याम्लः शनेक
षायः प्रयोजनम् आधानकाले यो बली तद्रसदोहदो गुर्विण्याः १४ मित्रामित्रादिशत्रूंले
नाह जीव इति जीवादयो सूर्यादीनां मित्राणि तथाहि रवेर्जीवो मित्रं विधोर्गुरुबुधौ कुजस्य सितबुधौ

१८
६

बुधस्य रविहीनाः सर्वे गुरोः कुजहीनाः भृगोस्य रवीन्दुहीनाः शनेः रवीन्दुहीनाः सर्वे मित्राणि केषांचिदे
वमतं सत्याचार्यमते तु स्वमूलत्रिकोणात् धनान्त्यसुतधर्मस्वामिनः स्वोच्चाद्धीशोऽर्थान्मूलत्रिको
णाच्चाष्टमचतुर्थपाः सर्वेषां मित्राणि तत्र विशेषः द्विराशीशो मित्रं एकराशीशो मध्यमः अनुक्त
राशीशो मध्यमः अनुक्तराशीशोऽरिः अथ रविचन्द्रयोरेकराशीशत्वेपि मित्रोद्विराशीशत्वाभावात्
त्वलक्षणयोर्विधिमित्रलक्षणविधिस्तस्य विनोधात् अन्ये पठिता न मित्राणीति शेषः तदुक्तं हो
रामकरन्दे स्वत्रिकोणभवनाधनान्त्यधीधर्मरंध्रसुखतुंगभेश्वराः सुर्निसर्गसुहृदोपरेऽरयः स
त्यमेतदिह सत्यभाषितं किंत्वनुक्तसकृदृहीरिताः सकृतु कीर्तिताः द्विषद्गणसवल्लभाः तेपित
त्समयमित्रशत्रुमिश्राधिशत्रुसुहृदारयो मताः ॥ १५ उक्तानेव सत्याद्युक्तान्नैसर्गिकमित्रादीन्सप्तदशभिः श्लोकैराह शत्रू इति ॥
रवेरिन्दुभौमजीवाः मित्राणि बुधः समः शुक्रशनी रिपू इन्दोः रविबुधौ मित्रे कुजगुरुभृगुमन्दाः स
मा रिपवो न सन्ति कुजस्येन्दुरविजीवा मित्राणि ताऽरिः सितार्कौ समौ मित्रे रविभृगौ कुजगुरु[illegible]
सौराः समाः चंद्रोऽरिः गुरोः रविचन्द्रकुजा मित्राणि शनिः समः बुधभृगौ रिपू चन्द्रो भृगोस्य बु
धशनी मित्रे कुजजीवौ समौ रवीन्दू रिपू शनेः भृगुबुधौ मित्रे गुरुः समः रवीन्दुकुजा रिपवः सत्रि

कोणभवनादित्यादिना ये पूर्वश्लोके उक्तास्ते मी विभज्य प्रपोक्ताः शेषस्फुटार्थं ॥१६॥ तात्कालिकमित्रा
दिभावं दर्शयन्नाह अन्योन्यमिति ग्रहाः परस्परं धनान्त्यायकर्मभ्रातृचतुर्थस्थास्तत्काले जन्मनि यात्रा
यां विवाहप्रश्ने वा मित्राणि स्युः स्वोच्चगृहे स्थितो पि मित्रमिति केचित् अन्यथा शत्रवः स्युः तद्यथा
एकराशिस्थाः सुतारिसप्तमाष्टधर्मस्थास्तत्काले ऽन्योन्यं रिपवः स्युः एकेति द्विभपानेकभपानकभपा
न् पूर्वोक्तान् मित्रसमारीन् नैसर्गिकान् शत्रुसंदर्शिता विस्पानो कान् तात्कालिकान् जन्मादौ तान् वा धिसु
हृदादिभिः कल्पयेत् तत्र स्वाभाविकमित्रं रिपुः समः समो मित्रं एवं धनाद्येषु स्थितो निसर्गसुहृ
न्नमः समः शत्रुरिति ॥१८॥ ग्रहाणां स्थानादिबलं होरकेनाह स्वोच्चेति स्वतिग्रन्थकं स्वोच्चे स्वमित्रगृहे
स्वमूलत्रिकोणे स्वनवांशे स्वराशौ च स्थितः स्थानबलाढ्यः रवेः सिंहः क्षेत्रं मूलत्रिकोणं च वि
धोर्वृषउच्चं मूलत्रिकोणं च कुजस्य मेषः क्षेत्रं मूलत्रिकोणं च बुधस्य कन्याक्षेत्रं मूलत्रिकोणं च
गुरोः धनुः क्षेत्रं मूल॰ भृगोस्तुला क्षेत्रं मूल॰ शनेः कुम्भ क्षेत्रं मूल॰ सार्वस्याम् विंशतिरं
शाः सिंहे त्रिकोणमपरं स्वभवनं कर्मस्य उच्चं भागत्रितयं वृषः इन्दोः स्यात्रिकोणमपरे शाः मे
षे द्वादशभागास्त्रिकोण [illegible] मपरे स्वमितं भौमस्य उच्चं मूलं कन्यायां बुधस्य तिथ्यंशाः समं विन्नं

२ परतस्त्रिकोणजातं पंचभिरंशैः स्वराशिजं परतः दशभिर्भागैर्जीवस्य त्रिकोणमतो स्वभं परं चापे ३
भुक्तस्यो शास्ति थयास्त्रिकोणमपरे द्यरे स्वराशिस्थाः कुम्भे त्रिकोणं निजभे रविजस्य रविर्भे पथा
सिंहे ४ दिग्बलमाह दिक्ष्विति बुधगुरू पूर्वां लग्नस्थौ बलिनौ रविकुजौ याम्यां दशमस्थौ शनि
प्रतीच्यां सप्तमस्थः सितेन्दू उदीच्यां सुखपाविस्थौ ध्यर्थः योयत्र बली ततः सप्तमस्थो विबलः तयोर्मध्ये
नुपाततः उचः १९ चेष्टाबलं दोधकेनाह उदगयनइति रविचन्द्रावुत्तरायणे बलिनौ १ कुजबुध
गुरुसितसौरा वक्रगा अनुपना अवलिनः ग्रहाणां रविणा योगोऽस्तमयः चन्द्रयोगः समागमः
कुजादीनामन्योन्ययोगो युद्धं तद्युद्धं सर्वे जयिन उच्यः समागमः शीतरश्मिसहितानां कुजादी
नां युद्धं निगद्यते अन्योन्ययुक्तानामिति विस्तीर्णरश्मयो बलिनः युधि अन्योन्ययोगो उत्तरदि
गस्थो बली भुक्तं विनाततद्युक्तं सर्वे जयिन उच्यस्था दक्षिणदिक्स्थो जयी भुक्तः इति २० का
लबलं नैसर्गिकं च मालिन्याह निशीति चंद्रकुजशनयो रात्रिबलिनः बुधः सदा निशि दिने च
बली रविगुरुसिता दिने बलिनः क्रूराः कृष्णपक्षे सौम्याः शुक्लपक्षे बलिनः स्ववर्षे स्वदिने स्व
कालहोरायां स्वमासे च बलिनः नैसर्गिकमाह शेषेति शब्दयोर्वर्णा आद्यानामियेषां ते मन्द कुजबुध

गुरुभृगुजचन्द्रार्काः उत्तरोत्तरं बलिनः २१ इतिश्रीमहीधरकृते जातकविवरणे योनिभेदोऽध्यायो द्वितीयः॥२॥ अथ वियोनिजन्माध्यायः तिर्यक्पदिस्थावरादीनामुत्पत्तिर्वियोनिजन्म तदुत्पन्नतिलकेनाह क्रूरग्रहैरिति चन्द्रगतद्वादशांशतुल्यं वियोनिसत्वं वदेत् यदि चन्द्रगतद्वादशांशो वियोनिसंज्ञः स्यात् नान्यथा। तत्र मेषद्वादशांशस्थे चन्द्रे मेषस्तत्त्वियोनेर्जन्म वृषस्थे वृषाश्वमहिषादे कर्कस्थे कुलीरादेः सिंहस्थे द्विपिभ्रगालमार्जारादि वृश्चिकस्थे सर्पकीटादेः धनुर्द्वादशांशोत्तरार्द्धस्थे ऽश्वखरादेः मकरद्वादशांशस्थे मृगस्य पूर्वार्द्धे मृगस्य उत्तरार्द्धे मकरादेः जलजंतोः मीनद्वादशांशस्थे चन्द्रे मत्स्यस्य जन्म परन्तु क्रूरैर्बलिष्ठैः सौम्यैरबलैर्बुधशनी वा केन्द्रगे एको वियोनिजन्मयोगः तदेवाह तारामिति शनिबुधदृष्टे चन्द्रे वियोनिद्वादशांशस्थे बलिषु क्रूरेषु अबलेषु सौम्येषु द्वितीययोगः १ योगान्तरं वैतालीयेनाह पापा इति पापा बलिनः स्वनवांशस्थाश्च सौम्या निर्बलाः परनवांशस्थाश्च लग्नं च वियोनि तदापि चन्द्रगतद्वादशांशतुल्यं वियोनिं वदेत् २ वियोनिजन्मां ग्यंगान्युपजात्याह क्रियइति मेषः पशूनां शिरः वृषो मुखकण्ठौ मिथुनः पूर्वपादौ कन्धौ कर्कः पृष्ठः सिंहो वक्षः पार्श्वद्वयं कन्या तुला कुक्षि द्वयं अलिर्गु

दं धनुः पश्चिमपादौ मकरो लिङ्गं वृषणौ स्फिचौ कुंभः मीनः पुच्छं चतुष्पदानां पक्ष्यादीनामुपलक्ष
णं तत्र पूर्वपदस्थाने पक्षपाली शेषं तुल्यं प्रयोजनं एवमुपलक्षितेंगवर्णादिज्ञानम् ॥ ३ ॥ वि
योनिवर्णज्ञानं वैश्वदेव्याह लग्नेति वियोनिजन्मनि ज्ञाते बलयुक्ताद्राशिनवांशाद्वर्णान्
वदेत् यदि स्वामिना युतस्य वा दृष्टस्य वा राशेर्नवांशो लग्नगः स्यात्तदा तल्लग्नवर्णांश्चेतादिकं वदे
दित्यर्थः हृतनष्टादावपि यद्वा लग्नयोगो ग्रह तद्वर्णांतामादिकं वदेत् तदभावे येन लग्न मी
क्ष्यते तद्वर्णयोगदृष्ट्याभावे लग्ननवांशराशीः वर्णाश्च रूभिर्युतं वा दृष्टं वा लग्नं तदा वहून् व
र्णान् वदेत् बलवतो वर्णा वा तुल्यं च त्रयो पत्राञ्चे पूर्वोक्तगतस्तत्र तद्वर्णं वदेत् लग्नात्सप्तमस्थे
ग्रहे तद्वर्णं पृष्ठे रेखां वदेत् ॥ ५ ॥ पक्षिजन्मवैश्रास्थेनाह खगेति सिंहकुम्भयोः प्रथममिथुन
तुलयोर्द्वितीयश्चेति खगद्रेकाणाः एषामन्यतमे द्रेष्काणे लग्नगे बलयत खगे न केनचिद्यु
ते शशिना युते दृष्टे वा स्थलजलपक्षिणां जन्म चन्द्रेण युते वा दृष्टे वा जलपक्षिणां इत्येको यो
गः चरनवांशोदये बलिना ग्रहेण युते शनिचंद्राभ्यां युते दृष्टे वा क्रमेण स्थलजलजानां ज
न्मेति द्वितीयः वा बुधनवांशको दये बलयत खग युक्ते शनियुत दृष्टे स्थलजानां चंद्रयुत दृष्टे जल

जानांमिति तृतीयः तदुक्तम् विहगोदितदृक्काणे ग्रहेण बलिना युते। पद्मचरभांशे बुधांशे वापि विहगाः
स्थलजाम्बुजाः शनिशशीक्षणाद्योगादिति ५ वृक्षजन्म वसन्ततिलकेनाह होरेति लग्नचन्द्र
गुरुसूर्यैर्बलहीनैस्तरूणां जन्म पृच्छतीति वाच्यम् तत्र जलजस्थलजरूपभेदेशदृतो ज्ञेयः कर्क
मीनमकरोत्तरार्द्ध जलचराः तद्राश्यंशोदये जलवृक्षाः अन्यराश्यंशोदये स्थलजाः तत्रसंख्या
माह लग्नादिति उदितांशपतिः लग्नतया वर्तते यो राशिः तत्संख्याका वृक्षा स्थलजजलजा वाच्याः अ
त्रांशपतिवशात्पृष्टस्य वक्तृगुणादिकं वाच्यं स्वतेग वक्रोपगते स्त्रिसंगुणमित्यादिना ५
स्थलजलांशपतिवशात्तरूणां विशेषज्ञानं मंदाक्रान्तयाह अन्तरिति रविरंशपतिस्तरून्
मध्यदृढान्सादयति शनिर्दुर्भगान् कुटजादीन् चन्द्रः क्षीरोत्तरून् पिप्पलादीन् कुजः कंटक
युतान् खदिरादीन् गुरुः सफलानाम्रादीन् बुधो विफलान् रेल्वादीन् भृगुः पुष्पतरून् जाती
चंपकादीन् चन्द्रः पुनः स्निग्धान् अक्षोटकादीन् कुजः पुनः कटुकपत्रान् भल्लातकादीन्
७ भूतरुशुभांशुभत्वानंसंख्या च वंशस्थेनाह शुभइति सएव स्थलजलजांशपतिः शुभःस
न् भूरुहे शोभितक्षेत्र। तद्विपरीतं तरु कुत्सितभूजातं करोति अन्यथागंशपतिरशुभस्तत्कालं सौम्य एअं०

राशिस्थश्चेत्तदाऽशुभं तन्नूनं भूमिजं वदेत् अर्थादेवं शुभे शुभराशिस्थे शुभं तन्नूनं भूमिजं अशुभेऽशु
भराशिस्थेऽशुभं तन्नूनं अशुभं भूमिजं वदेत् किंच स स्थलजलजांशपत्तिः स्वांशदृशा यावत्संख्ये परन
वांशेगतस्तावत्संख्यास्तज्जातीयास्तरवोभवन्ति ८ इतिश्रीमहीधरकृते जातकविवरणे वियो
निजन्माऽध्यायस्तृतीयः॥३॥ अथ निषेकाध्यायः तत्रादौ गर्भाधानमिति ऋतुनिरूपणं
तत्र स्त्रीनरसंयोगज्ञानार्थं शशाङ्केनाह कुजेति चन्द्रेपीडर्क्षे मनुपचयपदगेशे गते सति नारीणां प्रति
मासं रजोदर्शनं कुजेन्दुहेतुर्यस्यैदृशो गर्भयोग्यं भवति अयमर्थः नार्या जन्मराशेरनुपचय
स्थे चन्द्रे कुजदृष्टे गर्भाधानयोग्यं रजः स्यादन्यत्र बालानुरवंध्यावृद्धाभ्य इति ज्ञेयम् तदुक्तम्
स्त्रीणां गतोनुपचयस्थमनुष्णरश्मिः संदृश्यते यदि धरातनयेन तासां गर्भग्रहार्तवमुशन्ति
तदा न वंध्यावृद्धातुराल्पवयसामपि चैतदिष्टम् उपचयस्थे चन्द्रे रजो विफलमित्यर्थः ज्ञेयं
अथ योगमाह अतइति उक्ताद्विपरीते चन्द्रे अयमर्थः नरजन्मराशेरुपचयस्थे चन्द्रे शुभ
ऽंगमहोगुरुस्तेन दृष्टे नारीनरेणमैथुनं यातीति वाक्यम् एतच्च ऋतुविरमे चतुर्थादौ दिने बोध्यं
तदुक्तं पुरुषस्योपचयस्थो गुरुणा दृष्टोमतो ~~सहसंगमनाय~~ यदि दृश्यते हिममयूखः स्त्रीपुरुषसंयो

गेतद्वावदेदन्यथानैव।तथाच। अस्तविरमेत्स्यात्तायांयदुपचयस्थः शशीपुंसः बलिनो गुरुणा दृष्टो भर्ता
सहसंगमस्यात्तदेति १ मैथुनप्रकारमिन्दुवज्रयाह यथेति आधानलग्नात्सप्तमलग्नात्सप्तमः सप्तमो रा
शिः तत्सत्तोजंतुर्येनप्रकारेणमैथुनंकरोति।तथा नरमिथुनस्य संभोगो वाच्यः तस्मिन्सप्तमे पापै
र्दृष्टे युते वा सकलहं रतम् सौम्यैर्दृष्टेयुते वा सविलाससहासं रतम् केनापि युतदृष्टाभावे नसहासं नापि
सकलहम् २ गर्भसम्भवेवंशस्थेनाह रवीति आधानलग्ने यत्र तत्रस्थैः रवीन्दुशुक्रकुजैः स्वन
वमांशस्थैरवश्यं गर्भः स्यात् यद्वा पुरुषस्योपचयर्क्षगाभ्यां सबलाभ्यां सूर्यसिताभ्यां स्वनवांशगा
भ्यां गर्भः नार्याः उपचयर्क्षगाभ्यां कुजचंद्राभ्यां ईदृशाभ्यां गर्भः तदुक्तं बलयुक्तौ स्वगृहांशेष्वर्कसि
तावुपचयर्क्षगौ पुंसां स्त्रीणां वा कुजचन्द्रौ यदा तदा संभवति गर्भ इति द्वितीयं योगमाह गु
राविति नवपंचमलग्नान्यतमस्थे गुरावेव वक्ष्यमाणः संभवः स्त्रीणामेति योगा निष्फला चंद्र
कराश्चंधानामिव ३ आधानकालवशात् प्रसवावधि स्त्रीनरयोः शुभाशुभे वंशस्थेनाह दिवा
करेति रवेः सप्तमस्थौ कुजशनी स्त्रमासे पुंसो नो गमप्रदौ चंद्रात्सप्तमे कुजशनी नार्या रोगप्रदौ सूर्या
त्कुजशन्यो रेकोद्वितीये ऽन्योद्वादशे च तदा तयोर्वली नान्मासे पुंसो मृतिदो चंद्राद्देवनार्या मृतिदो एवम्

पुंसोनथेति रवौ शनिकुजाभ्यांयुते उंसोमतिर्यकः चन्द्रस्त्रियः तदर्कदृष्टिहि योः कुजशन्योर्मध्यादेवेनरवि
नायुतोऽपरेणादृष्टः तदापुंसोमतिः एवंचंद्रोऽपयेकेनयुतोऽन्येनदृष्टस्तदानार्योमतिः द्वयोर्वलि
नौमासे ४ पितृपितृव्यमातृमातृष्वसृणांशुभाशुभंवंशस्थेनाह दिवेति दिनेनिषिक्तस्यजातस्य
वारविः पिताशुक्रोमातानिशिशनिः पिताचन्द्रोमाताराज्ञोजातस्यार्कः पितृव्यः शुक्रोमातृष्वसादि
नेशनिः पितृव्यचन्द्रोमातृस्वसाप्रयोजनमाह ओजेति दिवाविषमराशिस्थितोरविः पितुःशुभः
निशिपितृव्यस्यदिवाशुक्रोसमराशिस्थोमातुःशुभः राज्ञोमातृष्वसुःशुभः शनीराज्ञोविषमगः
पितुःशुभः दिवापितृव्यस्यचंद्रोराज्ञोसमगोमातुःशुभः दिवामातृष्वसुः अथादेवोक्तवैपरी
त्येतेषामशुभः यथादिवासमगोर्कः पितुरशुभः राज्ञोपितृव्यस्यदिवाविषमः शुक्रोमातुरशु
भोराज्ञौमातृष्वसुः निशिसमगः शनिःपितुरशुभो दिवापितृव्यस्यनिशिविषमगश्चंद्रोमातु
रशुभोदिनेमातृष्वसुरिति ५ मातुर्मतियोगद्वयंकृतपदेनाह आभिलषन्निति पापैर्व्यं
पस्थैर्लग्नेचशुभेरदृष्टेगर्भिणीम्रियतेततइत्कम् अशुभेर्ल्लग्नाद्द्वादशक्षस्थैः शुभदृष्टिविवर्जितैः
आधानलग्नेमरणंयोषितःप्रवदेद्बुधः इतियोगान्तरमाह उदयेति शनौलग्नस्थेक्षीणेन्दुकु

जद्दृष्टो गर्भिणी म्रियते ६ योगान्तरं वैतालीयेनाह पापेति लग्नचन्द्रौ पापद्वयमध्यगौ पापदृष्टौ यातः
स्यात् सौम्यादृष्टौ चेत् अन्यथा स्थितौ वा तदा गर्भिणीयोगकर्तृकं वक्ष्यमाणं मासे म्रियेत ७ मानुर्मतिवैता
लीयेनाह क्रूरेति चन्द्राच्चतुर्थगे क्रूरे कुजेऽष्टमगे एको योगः लग्नाच्चतुर्थे पापे कुजेऽष्टमे च
द्वितीयः लग्नाच्चतुर्थे कुजे द्वादशे सूर्ये यत्र तत्र क्षीणे चन्द्रे तृतीयः आधानलग्ने एषाम
न्यतमे गर्भिणी म्रियते शास्त्रमतिं गर्भस्रावं च वैतालीयेनाह उदयेति लग्ने कुजे सप्तमे र्के
नार्यां गर्भिण्याः शस्त्रेण मृतिः कललेत्यादि नामासे शास्त्रवश्यति निषेकलग्ने मासेशोऽन्येन
जितः केनुस्यष्ट उत्कृष्टाभिहतो यातन्मासे गर्भस्रावः ९ गर्भपुष्टिं वंशस्थेनाह शशांकेति
लग्नस्थेः सौम्यैः द्वयोर्वा भयमे वा न वपंचम सप्तम द्वितीय चतुर्थे दशमस्थे वा चन्द्रात् लग्ना
त् द्वाभ्यां वैतेषु स्थितैः सौम्यैः तृतीयैकादशशत्रुगे भानौ लग्नाद्वा पापे भंगः सुखी यदि
लग्नचन्द्रौ वा रविदृष्टः स्यात् १० निषेकजन्मलग्नात्यतमकालात् स्त्रीत्वं शार्दूलविक्रीडितेन
ह ओजर्क्षे इति लग्नार्कगुरुचंद्रेषु विषमराशिगेषु विषमराशिनवांशस्थेषु च बलवत्सु पुं
जन्म लग्नादिषु समराशिगेषु तन्नवांशस्थेषु बलिषु चस्त्रीजन्म गुरुसूर्यौ विषमराशिगौ

ऋम

बलिनो पुंजन्मदौ शशिभुक्क्रकुजाः समराशिगाः बलिनः स्त्रीजन्मदाः नात्र नवांशनियमः एते द्विस्व
भावस्था बुधेक्षिताः स्वपक्षे युग्मं कुर्वन्ति अयमर्थः मिथुनकन्याधनुर्मीना द्विस्वभावाः तत्र मि
थुनधन्विनौ नरौ कन्यामीनौ स्त्रियौ मिथुनधनें शगौ जीवार्कौ बुधदृष्टौ द्वौ नरौ कुरुतः
कन्यामीनांशगाश्चन्द्रभृगुजकुजा बुधदृष्टाः स्त्रीद्वयम् उभयोर्मिश्रत्वे कन्या नरश्च ॥ पुं
जन्मयोगान्तरमप्युपजात्याह विलायेति आधानलग्नं पृच्छालग्नं वा तस्मात्काशानिर्लग्नाद्विष
मतृतीयपंचमाद्योगतः पुंजन्मदः योगकर्तृणां बलं विचार्य प्रसवे नरांगना वाच्या ॥ १२
क्लीबयोगानुशार्दूलविक्रीडितेनाह अन्योन्यमिति चन्द्रार्कौ क्रमात्समविषमगा वन्योन्यय
दि पश्यतः समराशिस्थचन्द्रो विषमराशिगं रविं पश्यति पर्कश्चेन्दुमित्यर्थः तदैकः क्लीब
योगः १ शनिबुधावपि यथाक्रमं युग्मौजर्क्षगतौ यद्यन्योन्यं पश्यतस्तदा द्वितीयः विष
मगो भौमः समराशिगमर्कं पश्यति रविश्च कुजं तदा तृतीयः ३ लग्नचंद्रौ विषमराशि
गौ समगेन कुजेन दृष्टौ तदा चतुर्थः ४ इन्दुबुधौ यथाक्रमं समविषमगौ यत्र तत्रस्थेन कुजेन

दृष्टोन्तदा पंचमः ५ भूकलग्नचंद्रा पुरुषराशिनवांशगाः तदा षष्ठः ६ १३ द्विविगर्भयोगान्शार्दू
लविक्रीडितेनाह ओजर्क्ष इति यदा चन्द्रभूसूनोः समराशिगो बुधकुजगुरुलग्ना विषमगास्तदा ग
र्भे स्त्रीपुंसौ १ यदा लग्नचन्द्रौ पुंग्रहदृष्टौ समराशिगौ तदापि मिथुनं यदा कुजबुधगुरुलग्नाः
समगा बलिनस्तदापि मिथुनं । यदा त्वोजराश्योर्बुधो द्विस्वभावांशगान्स्वग्रहगतान्लग्नग
तान्तद्यंगांशांपश्यति तदात्रयं वाच्यम् तत्र बुधेविशात् द्वंद्वाच्यं अयमर्थः मिथुनांशं
स्थो बुधो ग्रहलग्नगतान् द्व्यंगांशान्पश्यति तदा पंचद्वयं कन्यैका कन्या नवांशस्थो बुधस्ता
न्पश्यति तदा कन्याद्वयं पुत्र एकः अभिन्नेसममिति महोदयबुधेर मिश्रेः समलिङ्गस्थे
समलिङ्गत्रयं वाच्यम् अयमर्थः मिथुननवांशस्थो बुधो मिथुनधनुराशिगान्ग्रहान्द
पान्पश्यति तदा गर्भत्रयं यदा कन्यानवांशस्थो बुधः कन्यामीनौ कन्यात्रयं वाच्यम्
(उक्तं सारावल्याम् समराशौ शितशशिनो विषमे गुरुवक्रसौम्यलग्ने प्रयोगेऽस्मिन्गर्भे
गतं ... मिथुनं त्र्यवक्रं १ लग्नेन्दू वा समगौ पुंग्रहदृष्टौ मिथुनजन्मकरौ उदयजवक्त्रागुर एम

वोबलिनः समराशिगास्तथैवोक्ताः २ द्विशरीरांशकप्रकान्नग्रहान्विलग्नं चपश्यंतीऽसु
तः कन्यांशे द्वे कन्ये पुरुषश्च निगद्यते गर्भे मिथुनांशे कन्यैका द्वौ द्वौ पुरुषे मिथुनमेवं स्यात्
३ मिथुनधनुरंशगतान् ग्रहान् विलग्नं चपश्यतीन्दुश्च ते मिथुनांशश्चापदा पुरुषत्रि
तयं तदा गर्भे कन्यामीनांशकस्थान् विहगानुदयं च युवतीभागगतः ५ पश्यति शीतगु
तनयः कन्यात्रतयं तदा गर्भे इति १४ बहुसम्भवमुपजातमाह धनुर्द्धरस्येति धनुलग्नेष
नवांशस्थे सर्वग्रहेषु धनुरंशगतेषु बलवत्सु च लग्ने बलिना बुधेन शनिना वा दृष्टे बह
वो गर्भसङ्ख्या वाच्याः १५ गर्भमासेशानाहुरेनाह कललेति सिताद्याः प्रथमादिमासेषु
कललादीनि कुर्वन्ति ते तत्राधिपा ज्ञेयाः अयमर्थः गर्भस्य प्रथमे मासे कललं शुक्रशोणि
तमिश्रत्वं तत्र शुक्रोऽधिपः १ द्वितीये काठिण्यं कुजोऽधिपः ३ तृतीये हस्ताद्यवयवोत्पत्तिः
गुरुः स्वामी ३ चतुर्थेऽस्थ्युत्पत्तिः रविः स्वामी ४ पञ्चमे चर्मोत्पत्तिः चन्द्रोऽधिपः ५ षष्ठे रो
मोत्पत्तिः शनिरधिपः ६ सप्तमे चैतन्यं बुधोऽधिप ७ अष्टमे मात्राभक्षितस्य नालद्वारेणाशनेत

त्र गर्भाधानलग्नेशोधिपः ८ नवमेउद्वेगः चन्द्रोधिपः ९ दशमेप्रसवः सूर्योधिपः १० मासेसनुल्यं गर्भेशुभाशुभं आधानकालेपीडितग्रहे तन्मासेगर्भपातः मंदरश्मौ तन्मासिगर्भपीडा निर्मलग्रहे तन्मासिगर्भपुष्टिः तदुक्तम् कलुषैः पीडापतनं निपीडितैर्निर्मलैः पुष्टिरिति १६ अधिकाङ्ग योगं वागभावं च वंशस्थेनाह त्रिकोणगेइति बुधेलग्नान्नवमपंचमस्थे बुधान्यग्रहेषु बलेषु द्विशिरास्त्रितुर्भुजः स्यात् वृषस्थे चन्द्रे पापेषु कर्कालिमीननवमनवांशस्थेषु मूकः स्यात् एवंविधेपि चन्द्रे शुभदृष्टे चिरात्वाचकः ततेऽर्थात्पापदृष्टे मूकः निश्चदृष्टे बलिनः फलम् १७ सदन्तकुब्ज पङ्गु जन्म योगान्मन्दाक्रान्तयाह सौम्येति यदिशनिकुजौ कन्यामिथुनगौ तल्लवांशगौ वा तदा सदन्तो जायते कर्कलग्नस्थे चन्द्रे शनिकुजदृष्टे कुब्जः मीनलग्ने शनिचन्द्रकुजैर्दृष्टे पादहीनः रविकुजशनीनामन्यतमे चन्द्रे च कर्कालिमीनान्यनवांशगेऽत्र हीनः योगकर्तारो यदा ग्रहाः सौम्यैर्दृष्टास्तदा योग चतुष्कं पूर्णं वाच्यं बलिभिः सौम्यैर्दृष्टादृष्टा योगकर्तारो नामत्यबलैर्हीनबलैर्वा दृष्टाः असमग्रफलाः १८ राम

वामनहीनोङ्गयोगोऽधकेनाह सौरेति नवमनवांशस्थे मकरलग्ने शनिचन्द्रार्कैर्दृष्टे वामनः
स्यात् द्वितीयद्रेष्काणस्थे लग्ने पापयुते कुजयुते शनिचन्द्रार्कदृष्टे भुजहीनः तृतीयद्रेष्का
णस्थे लग्ने कुजयुते शन्यादिदृष्टे पादहीनः प्रथमद्रेष्काणस्थे लग्ने कुजयुते शन्यादिदृष्टे शि
रोहीनः स्यात् केचित्सौरादिदृष्टिं नानुवर्तयन्ति अनुवर्तनं साधुतरं क्रमम् लग्नद्रेष्काणगो
भौमः सौरसूर्येन्दुवीक्षितः कुर्याच्छिरस्तनहस्तं चमेवाङ्गवर्जितम् विपादं नवमे स्था
ने यदि सौम्यैर्नवीक्षितः इति १९ नेत्रवैकल्यं सहिरण्याह रवीति चन्द्रार्कयुक्ते सिंहल
ग्ने कुजशनिदृष्टे गर्भस्थोऽन्धो वा अर्थादेवं सिंहलग्ने ऽर्कयुते शनिकुजदृष्टे दक्षिणा
क्षिकाणः सिंहलग्ने चन्द्रयुते शनिकुजदृष्टे वा वामाक्षिकाणः सिंहलग्ने ऽर्कचन्द्रयुते शु
भपापैर्दृष्टे बुद्बुदाक्षः अत्राप्येकतमपक्षे प्रागवत आधानलग्नाज्जन्माद्वा द्वादशस्थ इन्दो
वामनेत्रं हन्ति रविर्षष्ठे दशा दक्षिणनेत्रं हन्ति त्रिकोणयोगे स्यादयोगाः शुभदृष्टा पा
पाः स्युः शर्णांफलं न यच्छन्ति किंचित्फलदा इत्यर्थः २० आधानकालात्प्रसवकालं ज्ञान

वसन्ततिलकेनाह तत्कालमिति. आधानकाले प्रस्मलन्नेवायत्र शीयत्संख्ये द्वादशांशे चन्द्रो
स्ति तत्तुल्यसंख्यो यो मेषादिगणनया राशिस्ततस्थे चन्द्रे पुरतो द्वादशमे मासि गर्भस्य प्रसवो वा
च्यः तदुक्तं सारावल्यां यस्मिन्द्वादशभागे गर्भाधाने व्यवस्थितश्चन्द्रः तत्तुल्ये तत्र प्रसवं गर्भ
स्य समादिशेत्वास्त इति अन्ये त्वेवं व्याख्याति आधानकाले यच्छशी यावत्संख्ये द्वादशांशे च
न्द्रस्तत्समानावत्संख्यो यो राशिस्तत्रस्थे चन्द्रे दशमे मासि प्रसवः तदुक्तं गार्ग्येण यावत्संख्ये द्वा
दशांशे शीतरश्मिर्व्यवस्थितः तत्संख्योपस्ततो राशिर्जन्मेन्दोस्तत्कृते वदेदिति तत्र दिनराशिस्ता
नमाह पायनीति गोजाश्विकर्कमिथुना इत्यादिना दिनरात्रिलग्नान्युक्तानि तत्राधाने
प्रक्षेपो लग्नस्य यो नवांशो दिनसंज्ञो रात्रिवाया वान् गतस्तावति दिननिशोः काले गते ज
न्म भवतीति वाच्यः तदुक्तं तत्कालं दिवसानि शासन्त्रः समुद्देति राशि भागो यः यावान्
द्यपस्तावान्वाच्यो दिवसेप्रत्रेवेति २१ चिरप्रसूतिं मालिन्याह उदयतीति निषेककलग्ने
मकरकुम्भान्यतमनवांशो उदयाति शनौ च सप्तमस्थे वर्षत्रयेण प्रसूतिर्वाच्या एषविधिर्यदि एम०

चन्द्राद्द्वादशांशे प्रसूतिः अयमर्थः आधानलग्ने यद्विकर्कांशः सप्तमस्थानं तद्राशौ द्वादशांशेऽस्य प्रसू
तिः निगदितेति २६ निषेकाध्याये आधानकालवशात् यथाविधानाज्जन्मोक्तं पितृमात्रादीनां
च शुभाऽशुभम् तज्जन्मलग्नवशाद्पि तादृशानां जन्मफलं च मां जन्मानन्तरं यान्यपरन्तु य
त्याप्यल्लसंभवति तल्लवाच्यम् गर्भस्याधानादिप्रसवकालादि च यथाधानजन्मलग्नात्स्यात्तथा
प्रश्नाद्पि वाच्यम् तदुक्तम् जन्मन्याधाने प्रसवकाले वा २२ ॥ इति श्रीमहीधरकृते जात
कविवरणे निषेकाध्यायश्चतुर्थः ॥४॥ सूतिकाध्यायमाह तत्र पितुरसान्निध्यमाह पितुरिति
चन्द्रे प्रसवलग्नमपश्यति पितुरसंनिधाने बालो जातः सूर्ये चरराशिस्थे दशमाच्युते ऽथवागते
नवाष्टमगे चन्द्रे च लग्नमपश्यति विदेशमे पितरि जातः स्थिरस्थे द्विस्वभावगेर्के वामध्याद्दृष्टे
चन्द्रे लग्नमपश्यति स्वदेशास्थस्यापि पितुरसन्निधौ जातः मार्गस्थस्य वापि पितुरसन्निधौ जातः
तदुक्तं होरामवीक्ष्यमाणो पितुर्जन्म्यगेहस्थिते शशिनि जातः मेषूरणच्युते ऽधमष्टमे भा
नौ विदेशगा इति १ योगान्तरमाह उदयेति शनौ लग्नगे वक्रः कुजे सप्तमे ऽन्यः शुभचन्द्रयोर्म

धनस्थे चन्द्रे ऽन्यः योगत्रये पितुः परोक्षे जातः २ सर्पवेष्टितत्वानमाह शशाङ्क इति चन्द्रे भौमद्रेष्काणगे
भुजङ्गेषु धनलाभस्थेषु सर्पो जात इति वाच्यम् भौमद्रेष्काणो मेषालिनोराश्योः कर्कधनयोर्द्वितीयः मी
न सिंहयोस्तृतीयः किंच पापग्रहसंबंधिनि लग्ने भौमद्रेष्काणगे भुजङ्गेषु त्वाद्यस्थेषु सर्पवेष्टितो जा
यते तत्रापि मेषालिप्रथमः सिंहस्तृतीयः क्षीणे चन्द्रे कर्के द्वितीयः ३ एकजरायुजवेष्टितयोर्द्वयो
जन्माह चतुष्पदे इति रवौ मेषवृषसिंहधनुरपरार्द्धमकरपूर्वार्द्धान्यतमस्थे शेषखगेषु द्वंगेगे
षु वलिषु चैकजरायुवेष्टितौ द्वौ जायते ४ नालवेष्टितत्वानमाह छागेति मेषसिंहवृषान्य
तमे लग्ने लग्नगे तत्राशनौ कुजे वा नालवेष्टितो जायते कुम्भगेन युते राशीति लग्नं नवांशराशिः
काला कुलितायां सेयत्रोक्तस्तत्राङ्गे नालवेष्टितः ५ जारजातत्वामंशस्थेनाह नलग्नमिति
गुरुर्लग्नं चन्द्रं च न पश्यति चन्द्रलग्नावेकराशिस्थौ पृथक्स्थौ वा गुरुर्ने पश्यति सजारजा
तो ज्ञेयः चन्द्रे लग्नयोर्जीवनवांशस्थयोर्न परजातः न इत्युक्तं अजीवभागे घनवेष्टिते वाजी
वेन चन्द्रे च विलग्नभे वा जानन्परो भूत मितिष्व्रवान्नीवा त्योजनाने सलवा विचलाय लोकादि एम

गेनेतयुक्तेवान्यराशिगते २

त्ति रवियुक्तं चन्द्रं गुरुर्यदिपश्यति तदापि परजातः २ भौमशनियुतोऽर्कोऽथवा चन्द्रेणापि युतस्तदापर
जातः ३ चन्द्रे गुरुक्षेत्रेऽद्रेष्काणे नवांशे द्वादशांशेऽन्यतमगे गुरुयुक्ते वा न परजातः तदुक्तम् गुरुक्षे
त्रगते चन्द्रे तद्युक्ते वान्यराशिगे न द्रेष्काणे तदंशे वा न परैर्जात इष्यते इति ६ पितृबंधनयोगस्वेताली
येनाह क्रूरर्क्षेति यदा क्रूरग्रहराशिगतौ कुजशनी रवेः सप्तमपंचमनवमस्थौ तदा वप्पिता वद्धो वा
च्यः चरराशिगेऽर्के परदेशे स्थिरगे स्वदेशे द्व्यंगगे पिता पथि वद्धो वाच्यः ७ पोतेप्रसवस्वेतालीये
नाह पूर्णेति कर्कस्थे चन्द्रे पूर्णे बुधे लग्नगे गुरौ चतुर्थे नौगता प्रसूते भक्रस्यासभवाज्जीव इति
व्याख्याने योगान्तरमाह उग्नरति मकरपश्चिमार्द्धकर्कमीनान्यतमे लग्ने सप्तमे च चन्द्रे नौगते च प्रसूय
न्ते ८ जलेप्रसवस्वेतालीयेनाह आप्येति जलराशौ लग्ने चन्द्रश्चेत्तदा जलसमीपे प्रसूतिर्वाच्या १
तत्र तत्र सम्पूर्णश्चन्द्रो लग्नगं जलराशिं पश्यति। तदापि जलान्तिके सूतिः २ यद्वा जलराशौ लग्ने श
तिः शमचतुर्थलग्नान्यतमे भे अंद्रस्तदापि जले सूतिः ३ ९ बंधनागारे सूतिं वेतालीयेनाह उ
दयेति चंद्रे लग्नस्थे पापदृष्टे शनौ द्वादशगे बंधनागारे सूतिः वृश्चिककर्कान्यतमे लग्ने शनियुते चन्द्रे दृष्टे

गतेजन्म १० क्रीडागारदेवालयोषरप्रसूतिमेवैतालीयेनाह मन्दइति जलराशिलग्नस्थे भानौ बुधदृष्टे क्री
डागारे जन्म रविदृष्टे देवालये चन्द्रदृष्टे ऊषरभूमौ सूतिर्वाच्या ११ श्मशानादिषु प्रसूतिमुपजात्याह न
लग्नगे इति पूर्वश्लोकान्मन्दस्य दाध्याहारः मिथुनकन्यातुलाधन्विपूर्वार्द्धकुंभाख्य नरलग्नगे शनिं कु
जे पश्यति सति श्मशाने सूतिः तादृशे शनिं सितचन्द्रयोः पश्यतो रम्यदेशे तादृशं शनिं गुरौ पश्य
त्यग्निहोत्रे रवौ तादृशं शनिं पश्यति नृपमन्दिरे देवगृहे गोकुले वा तादृशं शनिं बुधे पश्यति शिल्पिनां
चित्रकार पुस्तककार विट्ठकप्रभृतीनां गृहे सूतिं करोति १२ सूतिदेशवैतालीयेनाह एवीति रा
शिलग्न अंशकतुल्यदेशस्तत्स्थदृष्टेर्योजन्मस्य एवं सर्वेस्यादिनोक्तो जो यत्र राशिरूपयत्र सच
रति तत्रेत्यर्थः तत्र लग्नं तल्लवांशो वा यदि चरस्तदा तत्प्राणिसंचरणमार्गे प्रसूतिः स्थिरे स्वे द्वा
शि स्वगृहे स्थिरभावं गृहे तद्गृहनिकटे चरस्य स्थिरस्य द्व्यंगस्य वा लग्नस्यात्मीयनवांशे
निजगृहे सूतिः एषपरयोर्व्यभिचारे वलवतः फलं अयमर्थः तयोरेकस्य चरत्वेऽन्यस्यान्यत्वे यो
वलीतस्मरेशोवाच्यः १३ मातृत्यागं तस्य कष्टतम् वैतालीयेनाह आरेति एकराशिगाभ्यां कुजश

निर्भानवमपंचमसप्तमान्यें मस्ये च चन्द्रे जाते। मात्रा त्यज्यते १ तादृशे विपोगे चन्द्रे गुरुदृष्टे मातृत्यक्तोपि
चिरंजीवी सुखी च स्यात् १४ मातृत्यक्तविनाशं वसन्ततिलकेनाह पापेति सूर्य्येण शशिना वा दृष्टेच
न्द्रे लग्नगे कुजे च सप्तमे जातो माता त्यक्तो म्रियते सूर्य्यदृष्टे चन्द्रे लग्नगे कुजशनो लाभगयो यातोऽपि
मातृत्यक्तो मृयते पापदृष्टे चन्द्रे ७ लग्नगे सौम्येपि पश्यति सौम्यागदृस्तु त्वविप्राद्विर्णाहस्तं मातृत्स
क्तो याति जीवति च लग्नस्थं चन्द्रम्पापेघ्वेवं पश्यत्सु पापेषु योवलीतद्वर्णाहस्तंगतोपि म्रियते १५
सूतिगृहज्ञानमेतालीयेनाह पित्रिति पितृमातृगृहे वलात् मित्रमातृगृहे स्तनादिवार्के भृक्तोपि तस्मा
तस्संज्ञिताचित्याद्विनापित्रादिमहाउक्तः अयमर्थः रविशान्योरन्यतमे वलवति पितृपितृव्यस्य पि
तृव्यादिगृहे सूतिः चन्द्रभृक्रयोरन्यतमे वलवति मातृमातृष्वमातुलादिगृहे सूतिरिति शुभेषु सर्वे
षु नीचस्थेषु वृक्षप्राकारानद्यारूपारामगिर्यादिषु प्रसूतिः शुभैरित्यनुवर्तते एकस्थानगैस्त्रिप्रभृ
तिभिः शुभैर्यद्विलग्नेन्दूनदृश्यतेतत्रैकान्ते सूतिः १६ दीपासम्भवं भूसवं गर्भमोक्षं मातृक्लेशं च
मन्दाक्रान्तयाह मन्देइति यत्रतत्रगे चन्द्रे शनिनवांशगते ? प्रकारे सूतिकाशयनं वाच्यं १ लग्नाच्चतुर्थे च

न्द्रेऽपि चन्द्रेऽपि २ शनिदृष्टे यत्र कुत्र गते चन्द्रे तमस्येव ५ एवं निषेककालेऽपि वाच्यम् पंचस्वेतेषु योगे
षु चन्द्रेऽर्कदृष्टेऽधकाराभावः तदुक्तम् सौराशकस्थे शशिनि प्रलग्नाज्जन्मतेजलक्षांशमिश्रिते वा
स्वांशस्थिते चन्द्रगतेऽर्कजे वा जातस्तमिस्रे यदि नार्कदृष्ट इति त्रिप्रभृतिनीचस्थैर्गर्भमोक्षणे वा मूक
यद्दृति हरिजमिति गगनमवनौ प्रसक्तमिव दृश्यते यत्रेति वचनात् क्षितिजमुदयेऽरे खालग्नराशिर्ये
न विधिनोदयपातितस्तागर्भमोक्षो वाच्यः अयमर्थः शीर्षोदये पूतानस्यो हर दर्शयतो गर्भमोक्षः
पृष्ठोदये योमस्वस्य पृष्ठं दर्शयतः मीनोदये पार्श्वं दर्शयतो हस्ताभ्याम् तदुक्तम् शीर्षोदये विलग्ने मूर्ध्ना
प्रसवोऽन्यथोदये चरणैः उभयोदये च हस्तैः शुभदृष्टे शुभोऽन्यथा कष्ट इति क्रूरैश्चन्द्रयुक्तैः सप्तम
चतुर्थगैर्वा मातुः क्लेशः तदुक्तम् क्लेशो मातुः क्रूरैर्बन्धुस्तगतैः शशाङ्कयुक्तैर्वेति १७ दीप
द्वारयोर्ज्ञानमिन्दुवज्याह स्नेह इति चन्द्राद्दीपे तैलं वाच्यं अयमर्थः यत्र राशौ चन्द्रस्तद्राशिप्रा
रम्भे दीपपात्रं तैलपूर्णं वाच्यं राशिमध्येऽर्द्धं शयनान्ते तैलमभ्यमिति उदयादिति लग्नाद्वर्ति
र्वाच्या लग्नारम्भे तदहला रक्तावर्त्तिः लग्नमध्येऽर्द्धदग्धा लग्नान्ते दग्धप्रायेति शेषो वाच्यः तदुक्तम् यावल्लग्ना एन

इति तं वर्त्तिहग्घेत्तितावतीवाच्या रविराशिवशाच्चएषेहोपोवाच्यः अयमर्थः चरराशिस्थेर्के चापर्थमा
णोहोपः स्थिरएकदेशस्थः द्व्यंगेचरस्थिरः केचिदत्रैव्याचक्षते यद्वाशार्कः सपस्यांदिशिस्थितः
प्रागाहोशाः क्रियवृषेत्यादिनोक्तस्तस्यांदिशिहोपोवाच्यः यद्वा रविदृष्टग्रहरैः प्रागायरष्टदिक्षुयमयति
तत्र अम वशाघस्यांदिश्यर्कस्तिष्ठति तत्र गृहमध्ये होपोवाच्यः द्वारमिति केन्द्रस्थे ग्रहे द्वारं वाच्यं
प्रागाघारविमुक्रेत्यादिनोक्तं वर्कुषवलिनोदिशिकेन्द्रगाभावेलग्नराशेः प्रागाहोणाः क्रियते
त्यादिना वाच्यम् तदुक्तम् असतिवा विलग्नक्षीदिति लग्नद्वादशांशराशिदिगाभिमुखं द्वार
मिति केचित् तदुक्तम् लग्नेयाद्विरंसांशस्तदभिमुखं सूतिकागृहद्वारमिति १८ सूतिगृह
स्वरूपं शार्दूलविक्रीडितेनाह जीर्णमिति वीर्य्यसमन्वितैर्दिस्थनुवर्तते सर्वेग्रहेष्वंशनोवलवे
तिगृहं जीर्णसत् पुनः संस्कृतं वाच्यं १ कुजेवलिनिदग्धं २ चंद्रेवलिनिनवंलिप्तं ३ रवौव
लिनिअदृढमचिरात्पक्वकुलम् ४ बुधेवलिनिवहुशिल्पिरचितं भृग्वेवलिनिमनोहरं चि
त्रकर्मयुतंनवंच ६ गुरौवलिनिचिरकालस्थापि चक्रेति वक्रस्थेग्रहस्थानग्रहस्पष्टरः पश्चान्मा

२ ज्यो॰ टी॰
१८

र्गस्थैरन्यग्रहैः सामन्तपूर्वीसमंताभावाः सामंताः तत्रचौ प्रतिवेश्मगृहाणां पयोदिक्षुरेचनोव
द्देत १९ सुभेस्तवास्तु निरूतौ गृहज्ञाने दोषके नाह मेषेति मेषकर्कतुलावृश्चिककुम्भेर्लग्न
गैस्तद्देशो वा वस्तुतः प्राग्भावो सूतौ गृहं वाच्यं धनुमीनमिथुनकन्यालग्नैस्तद्देशो चोत्तरतः वृ
षलग्नेतद्देशो वा [illegible] प्रतीच्यां मृगसिंहलग्नेतद्देशो वा दक्षिणस्याम् २० तत्र शय्यायाविभा
गमेवालोयेनाह शय्यादीति गृहसूतौ गृहे शय्यादि स्ववाद्यकाशात् मेषादयो द्वौ द्वौ चरास्थि
रा दिक्षु जेयो द्विस्वभावास्तु तार आग्नेयादिकोणस्थाः अयमर्थः मेषवृषयोर्गृहस्य प्राग्भागस्
तिकाशयनं मिथुने आग्नेयां कर्कसिंहयोर्दक्षिणे कन्यायां नैऋते तुलावृश्चिकयोः पश्चिमे धनु
षि वायव्ये मकरकुम्भयोरुत्तरे मीने ऐशान्ये शय्यायामप्येष विधिः अथ तु विशेषः एवं पाल
ग्नाद्यतृतीयनवमद्वादशराशयः पादाः कस्याः अयमर्थः यत्र लग्ने तत्र सवस्तु दृक्तदिशि
शय्याशिरः षष्ठनवमौ पश्चिमपादौ षष्ठादूक्षिणपः नवमो वामः लग्नद्वितीयौ शीर्षभागः च
तुर्थपंचमौ दक्षिणाङ्ग सप्तमाष्टमौ पादान्तभागः दशमैकादशौ वामाङ्ग प्रयोजनमुक्तं विनत राम

त्वं पमलक्षैः क्रूरैस्तत्तुल्यमुपघातः ॥ इति तत्रांगगणेशपतत्र नष्टता यत्रपापास्तत्र तत्सदृशो
पघातः अंगेस्वामिना सौम्येन वा दृष्टयुतेन तत्साभावः पापे पि स्वोच्चगे त्रिकोणे मित्रक्षे
त्रस्थे उपघाताभावः २१ उपसूतिकाध्यायमनुष्टुभाह चंद्रेति लग्नाद्द्वारभ्य यत्र चन्द्रः स्थि
तः तन्मध्ये यावन्तो ग्रहाः तत्संख्या उपसूतिकासमीपवर्तिन्यः स्त्रियो वाच्याः ताश्च ग्रहतुल्य
जातिवर्णरूपाः वहिरिति यावन्तो ग्रहा दृश्ये चक्रार्द्धे तावन्तो वहिस्थाः यावन्तश्चादृश्ये ताव
न्तो गृहान्तस्थाः तत्र लग्नोदितभागा द्वादशैकादशदशमनवाष्टमसप्तमाः उदितांशाद्
दृश्यमर्द्धं शेषमदृश्यं अन्यथेति अपरे आचार्या अन्यथा व्याख्याति दृश्ये चक्रार्द्धे अभ्यन्तरगाः
अदृश्ये वाह्यगा इत्यर्थः अत्रापुर्वोपविधिना स्वचतुर्थं वक्रोपगते स्त्रि सङ्क्रामि स्यादिना
द्विस्त्रिगुणत्वं कृतोपसूतिकानिश्चयः २२ जातस्य रूपादिज्ञाने दोधकेनाह लग्नेति लग्ने
यो नवांशस्तस्य यो स्वामी तत्तुल्यकारो वाच्यः मधुपिङ्गलदृगित्यादिः यदा सर्वग्रहेभ्यो यो वली त
त्तुल्यतनुर्वा चंद्रराशिस्थो यो नवांशस्तत्तुल्यवर्णः एकांश्याम… भास्करइत्यादि कथितिः ॥

कादीनि गात्राणि विलग्नादिभिराशिभिर्विभक्तानि पल्यकालाङ्गानीति यदुक्तं तल्लग्नाद्यो ध्यं लग्नं शिरः १ धनं मुखं २ तृतीयमुरः ३ चतुर्थं हृत् ४ पंचमं क्रोडं ५ षष्ठं कटिः ६ सप्तमं वस्तिः ७ अष्टमं लिंगमगुदे ८ नवमं वृषणौ ९ दशममूरू १० एकादशं जानुनी ११ द्वादशं जङ्घे पादौ च १२ एवां द्वेविवयादयः इत्युक्ते यत्र दीर्घराशिस्तदङ्गं दीर्घं यत्र लघु स्तल्लघु दीर्घराशौ शोऽल्पराशिः स्या ऽल्पराशी शस्य दीर्घराशिस्थो मध्यः स्यादित्यादि अत्र प्रणामैकादिज्ञानार्थम् २३ योगविभागं शार्दूल विक्रीडितेनाह कमिति त्रिभिर्द्रेष्काणभागो स्त्रिधा शरीर विभागो ज्ञेयः लग्ने प्रथमद्रेष्काणे मूर्धनं गविभागः द्वितीये कण्ठादिः तृतीये वस्त्यादिः तत्राप्युदिते दृश्यभागस्थे वामभागे लग्नाद्दितभागद्वादशांशकादश दशमनवमाऽष्टमसप्तमा उदितभागा दृश्यं लग्नानुदितांशाद्द्वितीयचतुर्थपंचमषष्ठसप्तमोदितभागा अदृश्यंतद्दक्षिणाङ्गं अयमर्थः लग्ने प्रथमद्रेष्काणे लग्नं शिरः द्वितीयद्वादशे दक्षवामदृशौ तृतीयैकादशौ दक्षवामश्रोत्रे चतुर्थदशमे नासे पंचमनवमौ कपोलौ षष्ठाऽष्टमौ हनू सप्तमं मुखं १ लग्नगे द्वितीयद्रेष्काणे लग्नं कण्ठः द्वितीयद्वादशे दक्षवाम एभ॰

स्कन्धौ १

णौ तृतीयेकादशे वा हनू चतुर्थे दशमे पार्श्वे पंचमनवमे हृद्भागो षष्ठाष्टमे उदरभागो सप्तमे नाभिः २
लग्ने तृतीयद्रेष्काणे लग्नं वस्तिः नाभिलिङ्गमध्यभागः द्वितीयद्वादशे दक्षवामो शिष्णु गुदभा
गौ तृतीयेकादशे ऊरुणो चतुर्थदशमा जानूरू पंचमनवमे जानुनी षष्ठाऽष्टमे जङ्घे सप्तमे पादा
विति २४ अङ्गज्ञानप्रयोजनं तेनैवाह तस्मिन्निति द्रेष्काणविभागेन तस्मिन्नङ्गे गते पापग्र
हयुते व्रणो वाच्यः शुभेन दृष्टे युते वा मशकादिचिन्हं व्रणमशकादिकृतौ स्वराशौ स्थिरनवांशे
स्थिरराशौ स्थिरनवांशे वा स्थितः तस्य तदा व्रणमशकादिः सहजः स्वाभाविकः उक्तविपर्यये के
नचिन्निमित्तेन वक्ष्यमाणेन स्वदशाकाले वा वाच्यः तत्र निमित्तमाह मन्देति शनौ व्रणकर्तरि
पाषाणहेतुको वातव्याधिहेतुको वा व्रणो हि वाच्यः कुजे तत्कर्तरि वन्ह्यस्त्रविषोत्थः
बुधे भूघातहेतुकः पशुहेतुको वा चन्द्रे शृङ्गिपशुहेतुको जलप्राणिसमुत्थो वा वाच्यः
अन्यैः सितगुरुयुतबुधपूर्णचन्द्रैः शुभं वाच्यं यतः पापयुतो बुधः क्षीणश्चन्द्रश्च पापकरो
२५ योगान्तरं हरिणाह समन्विति यस्मिन्नङ्गे वामे दक्षिणे वा बुधयुतास्त्रयः पापाः शुभवर्जि

ताभवन्तीतन्नेष्टवीतं व्रणादेरवधं प्राप्तिः तन्मध्ये बलिनो दशायां किंचतनोर्लग्नात्पापः षष्ठभाग्नि
तः कालाङ्गनीत्या युक्तदेहभागो व्रणकरः स्यात् तत्रापि स्वर्क्षांशादियर संयुतेषु सहजः स्यादन्य
थागन्तुकस्त्वनुवर्तनीयं सषष्ठः पापः सौम्यदृष्टस्तिलकमशककरः तिलकः कृष्णबिन्दुः मश
कोऽर्बुदः स एव षष्ठः पापः शुभयुतो पतदा तिलको मशको वा लक्ष्य वा नचिन्हयुतं स्यात् घ
नलोमनिचयो लक्ष्म इति २६ इति श्रीमहीधरकृते जातकविवरणे सूत्राध्यायः पञ्चमः ५
रिष्टयोगे सत्यायुर्दायाद्यष्टकवर्गादेर्मिथ्यात्वात् रिष्टाध्यायः माह तत्र योगद्वयं नवमालयाह
सं ध्यायामिति अर्द्धास्तमयाद्दिनतोदयान्तं साधं तारानाशादि स्तृ यो ऽर्द्धोदयं यावत्स्यातः सन्ध्या
तत्र चन्द्रहोरायां पापैर्नवमनवांशस्थै जीतस्यान्मृतिः १ तथा च न्द्रेण पापत्रयेण च केन्द्र
चतुष्के प्राप्ताऽन्तेपि मृतिः २ १ योगान्तरमिन्द्रवज्रयाह चक्रस्येति पार्वतो लग्नाशा उदि
तासा वंतश्चक्रस्यांशो स्फुटाशेषभागाः पंचमषष्ठसप्तमाष्टनवमादृशमस्य लग्नाद्भितभा
तुल्या आग्रक्रस्यापरार्द्धांशेषु पूर्द्धे ऽर्द्धे पूर्वभागेषु पापेषु पश्चिमभागेषु सौम्येषु कर्कटराशिका एम॰

न्यत्तमेलग्नेजातः सद्योनश्यति द्वितीयद्वादशषष्ठाऽष्टमेगैः पापैश्चमृतिः तदुक्तम् रिपुव्ययगतैः
पापैर्यद्विवाधनमत्युगैः लग्नेवापापमध्यस्थे घूने वा मृत्युमाप्नुयात् २ योगान्तरमनुष्टुभाह
पापाविति लग्नेसप्तमेचपापाः चन्द्रः शुभादृष्टः क्रूरयुतश्चेत्तदा मृतिः योगान्तरमाह क्षीणेति
क्षीणेन्दुर्व्ययपापालग्नेऽष्टमेचसौम्याः केन्द्रेषुनतदामृतिः ४ योगान्तरमाह क्रूरेति शुभादृष्टः
शशीक्रूरयुतश्चसप्तमद्वादशाष्टमलग्नान्यतमस्थः शुभाः केन्द्राद्बहिःस्थाः तदामृतिः उक्तंच
व्ययपाष्टसप्तादयगो शशाङ्कः पापैः समेतेशुभदृष्टिहीने केन्द्रेषु सौम्यग्रहवर्जितेषु जातस्यस
द्योभवतीनाशइति ५ योगांतराणिपद्याह पापीनोति पापदृष्टिश्चन्द्रः षष्ठोऽष्टमवाशीघ्रंमृति
दः [illegible] केवलसौम्यैर्दृष्टस्तादृगिन्दुः रिष्टाच्छं जीवयति २ षष्ठाष्टगश्चन्द्रः सौम्यपापैर्दृ
ष्टोऽस्तचतुष्टये ३ अर्थाद्व्ययषष्ठागश्चन्द्रः केनाप्यदृष्टः सौम्यक्षेत्रगो वा पापक्षेत्रगः सौम्य
युतोवानमृतिदः तथाकृष्णपक्षेदिवाजन्मनिशुक्लेचरात्रौषष्ठाऽष्टमगः चन्द्रः शुभाऽ
शुभदृष्टोऽपिनमृतिदः तदुक्तं मानुष्येन पक्षेसितेभवतिजन्मपरिक्षपायांकृष्णेतथाहनीत्पा

दि असमिरिति बुधगुरुसितान्यतमे षष्ठ्याऽष्टमगे बलवत्पापदृष्टे मासमायुः ५ तद्दृष्टो शुभे शुभदृ
ष्टे मृत्युभावः लग्नेशे पापजिते सप्तमस्थे त्रमासमायुः ५ ६ योगान्तराणि मेदिनीकान्त्याह लग्ने
इति क्षीणेन्दौ लग्नगे पापेषु केन्द्राष्टमगेषु मृतिः १ चतुर्थाष्टमसप्तमगे पापद्वयमध्यगे चंद्रे
च मृतिः २ पापद्वयान्तस्थे चंद्रे लग्नगे बलवच्छुभदृष्टिसंत्रमाष्टमगे पापे च मासत्रयात्सार्द्धं मृ
तिः ३ बलिशुभदृष्टे चलाद्रूढचन्द्रे तस्यैव मृत्युर्न मातुः ७ रिष्टान्तराण्युपजात्याह राज्ञीति
यत्र तत्रस्थेन्दुः शुभादृष्टो नवमनवांशगः नवमपंचमगाः पापास्तदाशुमृत्युः १ चन्द्रो ल
ग्नेशः सप्ताष्टमपापास्तदापि मृतिः १ ८ रिष्टान्तराण्याह अशुभेति षष्ठेश्वरगास्थः शनियुतश्चे
न्नु लग्ने कुजोऽष्टमस्थस्तदा मातृसुतयोः मृतिः १ उपरागस्थः शनिबुधयुतो कौ लग्ने कुजो वा कौ
लग्ने कुजोऽष्टमस्थस्तदा मातृसुतयोः शस्त्रेण मृतिः २ बलवच्छुभैरयुतदृष्टो रविरिन्दुर्वा ल
ग्नगः पापास्त्रिकोणाष्टमगास्तदापि मृतिः ३ ९ रिष्टान्तरमौपच्छन्दसिकेनाह असितेति श
निरविचंद्रकुजाः क्रमान्नद्वादशनवमलग्नाष्टमगाः बलवज्जुरुणानदृष्टास्तदाशुमृतिः स एम

दालेषां मध्ये काश्चिद्बली ग्रहः पश्यति काश्चिन्न अवलो वा सर्वान्पश्यति तदा चिरेण मृतिदः अर्था
देवं च मो बली ग्रहर्यदा सर्वानाक्षते न दा रिष्टाभावः १० रिष्टान्तरं पुष्पिताग्रयाह युतेति यदा
पापयुतः क्षीणचंद्रः पंचमसप्तमनवमद्वादशलग्नाष्टमान्यतमस्थो बलिना सितज्ञधजीवान्य
तमेक्षा युतदृष्टस्तदा मृतिदः अर्थाद्युतदृष्टे रिष्टभावः ११ अनुक्तमरणकालनाम रिष्टयो
गानां कालज्ञानं अमरविलसितेनाह योगइति यत्रयोगे कालो नोक्तस्तत्र योगकरणे ग्रहा
णां यावती शयराशौ स्थितो जन्मनि सप्तएषी बलिनः स्थानं जन्मनि चन्द्रो यद्राशौ सप्त
स्थानं तनुलग्नं पापदृष्टो बलवांश्चन्द्रो यद्राशौ वर्षमध्ये चारं चेव प्रागुक्तस्थानान्यतमरस्था
नं प्राप्नोति तदा मारयति वर्षं नातिक्रमतीत्यर्थः १२ इति श्रीमहीधरकृते ब॰ जातकवि
वरणे रिष्टयोगाध्यायः षष्ठः ६ अथाऽयुर्दायाऽध्यायउच्यते तत्र पूर्वोक्तरिष्टहीनस्यायु
र्दायः कार्यः आदौ मयादिमतेन रव्यादीनां परमायुः प्रमाणं पुष्पिताग्रयाह मयेति स्वो
च्चेस्थेषु रव्यादिषु दशयुता नवमादयोऽङ्कमयपवनमणित्थशपराशरेरुक्ताः तथाहि परमो

ए.ज्यो.टी.
२२

उच्चगो रवौ परमायुः प्रमाणमेकोनविंशतिवर्षाणि १ एवमग्रेपि चन्द्रस्य पंचविंशतिः २ भौमस्य पं
चदश ३ बुधस्य द्वादश ४ गुरोः पञ्चदश ५ शुक्रस्यैकविंशतिः ६ शनेर्विंशति ७ अङ्कतोपि १९
२५।१५।१२।१५।२१।२०। मिलित्वा सप्तविंशत्युत्तरं जातं सर्वे उच्चगा एतावदायुर्ददती
त्यर्थः। उच्चान्यगेषु गृहेषु पूर्वोक्ताद्ध्रासं मन्दाक्रान्तयाद्य नीचेति परमनीचस्थेषु गृहे
ष्वपूर्वोक्तादर्द्धीभवते तच्च मासैरुच्यते रवेश्चतुर्दशाधिकं शतम् ११४ मासाः चन्द्रस्य सार्द्ध
शतम् १५० भौमस्य नवतिः ९० बुधस्य द्विसप्ततिः ७२ गुरोर्नवतिः ९० शुक्रस्य षड्विंशत्य
धिकं शतम् १२६ शनेर्विंशत्यधिकं शतम् १२० परमनीचस्थानां ग्रहाणामिदं परमायुः
उच्चनीचमध्यवर्तिनि खेगे ततो नीचोच्चादनुपातः कार्यः त्रैराशिकविधिर्विधेयः स
च लीलावत्यामुक्तः प्रमाणमिच्छा च समानजाती आद्यंतयोस्तः फलमन्यजाति मध्येतदि
च्छाहतमाद्यहृत्स्यादिच्छाफलं व्यस्तविधिर्विलोमे इति तथाहि यदि भगणार्द्धलिप्ताभिः
खखाहिहिमांशुसंख्याभिरेताभिः १०८०० इष्टग्रहस्य परमनीचमासा लभ्यन्ते तदा ग्रहभुक्ति तदा

लिप्ताभिः कियन्तं इति तथा च ग्रह भुक्त लिप्ता ग्रह परमनीचमासैः संगुण्य प्राग्वद्विभज्याप्तं दिवसाः
दिनशेषं षष्ट्या तं गुण्य प्राग्वद्विभज्याप्तं घघः षष्टी शेषं षष्ट्या संगुण्य प्राग्वद्विभज्याप्तं प
लानि एवं मासादि पलान्तः कालोऽत्रागतो ज्ञेयः मासानां द्वादशभिर्भागमपहृत्याप्तं वर्षाणि
शेषं मासा एव एवमागतं वर्षाद्यायुः परमोच्चायुर्वर्षेभ्यः शोध्यं शिष्टं वर्षाद्यायुर्ग्रहेणादत्तं ज्ञेयं
एवं सर्वेषां कार्यं एवमुच्चादिच्युतस्य नीचप्राप्तस्य कार्यं अपनीचाद्विच्युतस्योच्चमप्राप्तस्य
प्राग्वत्कालमानीय तस्यैव ग्रहस्य परमनीचायुषि संयोजयेत् तद्वयं ग्रहस्यायुः कालो वर्षा
दिर्भवति लग्नायुर्दायमाह होरेति लग्नं स्वभुक्तनवांशतुल्यानि वर्षाणि दत्ते तत्कृतिर्यथा
लग्नस्य राशीन् यास्यांशादि लिप्ताः पिण्डं कृत्वा शतद्वयेन विभज्याप्तं भुक्तनवांशा[illegible]
वर्षाणि [illegible] शिष्टस्य त्रैराशिकं कृत्वा मासाद्यानेयं यथा यदि लिप्ताश
तद्वयेन द्वादश मासा लभ्यन्ते तदा वशिष्टलिप्ताभिः कियन्तं इति ततो वशिष्टलिप्ता द्वादशभि
संगुण्य शतद्वयेन विभज्याप्तं मासास्ते वर्षाधःस्थाप्याः मासशेषं त्रिंशता संगुण्य प्राग्वत् विभ

ज्याप्तं दिवसास्तेमासाद्यः दिनशेषं षष्ट्यासंगुण्य प्राग्वद्विभज्याप्तं घट्यः ताः दिनाद्यः स्थाप्याः घटीशेषं षष्ट्या
संगुण्य प्राग्वद्विभज्य वाप्तं पलानि अथ साद्यः स्थाप्यानि एवं लग्नायुर्ज्ञेयः अपरे आचार्या राशितुल्यं ल
ग्नायुर्वदन्ति लग्ने नयावन्तो राशयो भुक्तास्तावन्ति वर्षाणि लग्नायुः लग्नस्य भुक्तभागादिकं त्रिघ्नी
कृत्य त्रिराशीकेन मासाद्यानेयं तदुक्तम् लग्नराशिसमाः प्रोक्ता मासाद्या मनुपा ततः यावद्भवेत
दाकालं वर्षाद्यं लग्नजीवितमिति तद्यथा यद्यष्टादशभिर्लिप्ताशते द्वादशमासा लभ्यन्ते तदैता
भिर्लग्नभुक्तलिप्ताभिः किमिति प्राग्वर्षाद्यो मासादि स्थाप्य इदं मतं साधु अन्ये वदन्ति लग्नां
शायेव लिप्यं पातुल्यं राशीशेव लिनिराशितुल्यं लग्नायुरिति तदुक्तम् लग्नोदयांशतुल्याः स्या
दन्तरे वा नपातनः तस्मात्तो बलसंयुक्ते राशितुल्यं तु भाधिपे इति हित्वेति कुजदयोगहापहिश
तु ग्रहगाः सत्तो वक्रगतयो न स्युस्तदा स्वदत्तायुषस्तत्तोपभागं हरन्ति भुक्तशानीचनः स्वंपाता
ग्रहाः स्वदत्तार्द्धं हरन्ति स्थानिद्वयेप्राप्तेयोधिकासेकाकार्या न तन्त्र कार्यहानिः धापैत्तिभावः
२ वक्रपातवशात्स्वयुर्हीनिग्रहर्षिणपाह सर्वेति अपाद्विलोमं षट्सुस्थानेषु पापयुतेषु सर्वार्द्ध

महर्षयोः द्वादशाब्दसिंहमासौक्षौ एदिन विलग्नो पलक्षणम् षोडशाब्दं षण्णामादिमगणाम्परमायुः ३
रनिरतः पशूनापालकश्च २ पाशयोगे धनार्ज्जने नतिशीलः असन्मार्गेण धनार्ज्जकः इत्यर्थः तथाभृत्यावंधवश्चानाकराः ३ केदारयोगे कृषिकरः बहूनामुपकारी ४ शूलयोगे क्रुद्धप्रियः प्रहारयुतश्चर्थप्रियः दरिद्रश्च ५ १८ युगगोलयोः फलं नाभसयोगेनां सर्वदशास्वपि फलदातृत्वं वहिरेणापादधनविरहितेति युगयोगे निर्धनो वेदमार्गव्ययेतश्च १ गोलयोगे निर्धनः मलिनाङ्गो मलिनवस्त्रः सर्वैः लोके निन्द्यशिल्पकर्ता कर्मपटुः भ्रमणशीलः नव्वलस्रो ऽटनश्चेति विकृतं उच्यते यद्यपि स्वरूपेणालसत्वमुपाधिभोजनस्याटनं विनासंपादयितुमशक्तेरटनः ७ एवं फलैः सार्द्धं नाभसयोगा उक्तास्ते सर्वेषां दशासु स्वकीयफलं ददाति तेयोगा दशाष्टकवर्गफलं हिताये भवन्ति दशापतिर्दशाफलं ददाति गोचरे चाष्टकवर्गोस्य च नन्वेवं नाभसस्यापि फलदे दशापतेश्च शुभफले च न द्वेपरीत्ये वाधिनोध इति चेन्न भोगिनोप्याधि भिरभिभूयं तेभेक्षाशिनोपि शीतलद्रुमछायामाश्रितः सुखिनमात्मानं मन्यन्ते इति मिश्रफलो न भावोभोगिनां दरिद्राणां चं सं भवत्येव यवनमते सार्द्धशतं १५० नाभसयोगा उक्तास्ते कथ्यन्ते लग्न

चतुर्थयोः सर्वैर्गदा तुर्ययोस्तयोः सर्वैः शंखः सप्तमदशमयोः सर्वैर्वज्रः २ दशमलग्नयोः सर्वैर्ध्वजः
४ शंखचक्रध्वजैः सह पूर्वोक्तास्त्रयोविंशतिः सप्तविंशत्युत्तरशतं संख्यायोगाः यथा एके
विकल्पाः सप्त द्विविकल्पाः एकविंशतिः त्रिविकल्पाः पंचत्रिंशत् चतुर्विकल्पाः पंचत्रिंशत्
पंचविकल्पा एकविंशतिः षड्विकल्पाः सप्त सप्तविकल्पाः एकः एषां मेलने सप्तविंशत्यधिक
शतं १२७ पूर्वोक्तत्रयोविंशत्या सह सार्द्धशतं एषां द्वादशराशिकेनाष्टादशशतानि भवंति तदुत्प
त्तिप्रकारो गणितशास्त्राज्ज्ञेयः विस्तरभयान्नोच्यते १९ इति श्रीमहीधरकृते बृहज्जात
कविवरणे नाभसयोगाध्यायो द्वादशः १२ अथ चन्द्रयोगाध्यायः प्रथमेति विनयः सु
शीलता वित्तं धनं ज्ञानं शास्त्रबोधः धीर्बुद्धिः नैपुण्यं कार्येषु सूक्ष्मदर्शित्वं अर्कात्केन्द्रगे
विनयादीन्यधमानि अतस्त्वापणफरेन भवंतीत्यर्थः रवेः पणफरगे चन्द्रे नातिमध्यानि ष
ल्यानि कथितानीत्यर्थः रवेरापोक्लिमगे चन्द्रे तान्युत्कृष्टानि तदुक्तं मूर्खो नहरि ... पला
नविशालानूचंदः प्रसूते ... चतुष्टयस्थः कुर्याद्दितीबेधनिनां प्रसूति मापोक्लिमस्थे च कु

लग्नजातामिति अहनीति दिवाजन्मनि यत्र तत्र स्थश्चन्द्रो यदि नवांशस्थोऽधिमित्रन
वांशस्थे वा गुरुणा दृष्टश्चेन्नरा धनी भोगी च एवं जन्मनि तादृशश्चंद्रः भृगुदृष्टश्चेन्नरा धनी
भोगी चेत्तदुक्तं स्वांशेऽधिमित्रस्यांशे वा स्थितो दिवसेशशी गुरुणा दृश्यते तत्र जातो वित्तसुखा
न्वितः निशायामेवं भृगुणा दृष्टः शशी जन्मनि दृश्यते विपर्ययस्थे शीतांशौ जायतेऽल्पधनो नर इ
ति १ अधियोगं सफलं वसन्ततिलकेनाह सौम्यैरिति चंद्रात्सप्तमषष्ठाष्टमगैर्बुधगुरुसितैर
तः सप्तधा षड्विधा इति व्यासकृतो विस्तारेण सप्तधा स्फुतरत्वर्थः तद्यथा षष्ठगैः सर्वैः सौम्यैरे
कः सप्तमे द्वितीयः अष्टमे तृतीयः षष्ठसप्तमे चतुर्थः षष्ठाष्टमैः पंचमः सप्ताष्टमैः सप्तमइति
अर्थादेवं स्थितैः पापैः पापयोगः मिश्रैर्मिश्रः तदुक्तम् षट्सप्तमाष्टमसंस्थैश्चन्द्रात्सौम्यैः
शुभोधियोगो पापाः पापैः एवं मिश्रैर्मिश्रस्तथैवोक्त इति अधियोगमाह तस्मिन्निति अ
धियोगजः सेनापतिः मंत्री भूपो वा स्यात् एवंफलानां भंगपदसंभवादेवं ज्ञेयं उक्तः वीर्यैः
सौम्यैर्नृपः मध्यबलैर्मंत्री हीनबलैः सेनापतिरिति नृपादीनामन्यतमाश्चाधियोगे भवंतीति एव

वकुसुखावहैश्वर्यानष्टरिपुश्चिरजीविनः नीरोगा निर्भयाश्चेति अन्येऽपि राजयोग एवोक्तः त
दुक्तम् द्यूनं षष्ठमष्टमं शिशिरगोः प्राप्ताः समस्ताः शुभाः क्रूराणां पदगोचरे न पतिता भा
न्यलपाहूरतः भूपालः प्रभवेत्तस्य यस्य जलधेर्वेलावनीतो भवैः सेनामत्तकरीन्द्रदाननसलि
लं भंगुरं भुङ्क्तेः पिपत्ते इति २ सुनफानफादुरधराकेमद्रुमाख्यं योगं च शार्दूलविक्रीडितेनाह
हिलेति रविविना चन्द्रात् द्वितीयगैर्ग्रहैः सुनफा योगः द्वादशगैरनफा योगः द्विद्वादशगैर्दुरधरा
योगः रवियोगभंगस्तेनपरं योगकर्ता मध्ये न गण्यत इत्यर्थः एतद्योगत्रयाभावे केमद्रुमयोगः
एते योगाः सर्वसंमताः कश्चिदाचार्यैर्लग्नात् भौमादिग्रहे केन्द्रगे भौमादिग्रहयुते वा केमद्रुम
भङ्ग उच्यते चंद्रादपि केन्द्रगे ग्रहे केमद्रुमभावः तदुक्तम् व्ययार्थकेन्द्रगश्चन्द्राद्विना भानुन
चेद्ग्रहः कश्चित्स्याद्वा विना चन्द्रं लग्नात्केन्द्रगतोऽथवा योगः केमद्रुमी नाम तदा स्यादिति ग
दितः भवंति निंदिता चारदारिद्र्यमयसंयुताः इति मतान्तरमाह केचिदिति केचिदाचार्याः
केन्द्रेषु केचिन्नवांशेषु योगत्रयं वदन्ति तद्यथा ताराग्रहैश्चंद्राच्चतुर्थगैः सुनफा दशमस्थैर

नफा चतुर्थदशमस्थैर्दुरधरा अतोऽन्यथा केमद्रुमः तथा श्रुतकीर्तिः चन्द्रचतुर्थस्थैः सुनफा दशमस्थैः
कीर्तितोऽनफा विहगैः उभयस्थितैः दुरधरा केमद्रुमस्तत्त्रितोऽन्यः इति केचिन्नवांशकेषु योगं
यं वदन्ति यथा। यत्र तत्र राशौ यद्राशिसंबंधिनि नवांशे चन्द्रस्तस्माद्राशेर्द्वितीयराशौ तारग्रहैः
सुनफा चन्द्रनवांशराशौ द्वादशगैस्ताराग्रहैरनफा चन्द्रनवांशराशौ द्वितीयद्वादशगैस्ताराग्रहैर्दुर
धरा चन्द्रनवांशराशौ द्विद्वादशौ यदा शून्यौ तदा केमद्रुमः। तथा च जीवशर्मा यद्राशिसञ्ज्ञे
शीतांशुर्नवांशे जन्मनि स्थितः तद्द्वितीयस्थितैर्योगः सुनफाख्यः प्रकीर्तितः द्वादशैरनफा
ज्ञेयो ग्रहैर्द्विद्वादशस्थितैः प्रोक्तो दुर्धरयोगोऽन्यथा केमद्रुमः स्मृतः इति तन्मतमाघमाह
उक्तयोगानामेवंविधं मतद्वयं केनचिदुक्तं नवांशत्वेन योगोऽयं क्वचित्ते लोके न प्रसिद्धो वृद्धैरनं
गीकृतत्वात् ३ सुनफादीनां संज्ञामिन्द्रवज्रयाह त्रिंशदिति एकत्रिंशत्सुनफा योगाः तावन्त एव
वानफाश्चाशीत्युत्तरं शतं दुरधराभेदाः रूपाविकल्पैः परिपाट्याभिनीयसंख्यायनीते सतिथि
रत्तिः कार्यो नर्भयो न्यनीतिः स्थानान्तरे चालनं कार्यमयमर्थः सुनफादयो भौमबुधगुरु एम

सिता सिते: पंचभि: नि:पाद्यते। तस्मात् द्विस्था विकल्पाः पंच तेषां न्यासः तत्र लीलावत्यां भास्करो
क्तविधिना विकल्पसंख्यानयनं तदुक्तं तेन एकाद्येकोत्तरा अंका व्यस्ता भाज्याः क्रमात्स्थितैः
परः पूर्वेण संगुणस्तत्परस्तत्परेण च एकद्वित्र्यादिभेदाः स्युः इदं साधारणं स्मृतमिति एकादि
का एकोत्तरा व्यस्ता अंकक्रमस्थितैर्भाज्याः लब्धैर्गुणिताः सन्तः इत्यर्थः यथा पञ्चानामाद्यस्थं
छेदः तेन पंचानां भागमपहृत्य वा पूर्वं पंच ५ तैर्द्वितीयस्थाने चतुरः संगुण्याधःस्थाभ्यां भा
गे हृते लब्धं १० तैस्तृतीयस्थाने त्रीन् संगुण्याधःस्थैस्त्रिभिर्भक्ते लब्धं १० तैश्चतुर्थस्थानस्थौ
द्वौ संगुण्याधःस्थैश्चतुर्भिः भक्ते लब्धं पंच ५ ॰ तैः पंचमस्थानस्थमेकं संगुण्याधःस्थैः पंच
भिर्भक्ते लब्धं १० तैश्चतुर्थस्थानस्थौ द्वौ संगुण्याधःस्थैश्चतुर्भिः भक्ते लब्धं पंच ५ तैः पंच
मस्थानस्थमेकं संगुण्याधःस्थैः पंचभिर्भक्ते लब्धं एकं १ एवं विकल्पाः ५।१०।५।१। ए

५	४	३	२	१
१	२	३	४	५

कादिका ज्ञेयाः यथा एकविकल्पाः पंच द्विविकल्पाः पंच द्विविकल्पा दश त्रि
विकल्पाः दश चतुर्विकल्पाः पंच पंचविकल्पा एकः एवमेकत्रिंशत्सु नष्टा

तेयथा चन्द्राद्द्वितीयभौमः १ बुधः २ गुरुः ३ शुक्र ४ शनि ५ एवमेकविकल्पाः पंच कुजबुधौ ६ कुजजी
वौ ७ कुजशुक्रौ ८ कुजशनी ९ बुधगुरु १० बुधशुक्रौ ११ बुधशनी १२ गुरुशुक्रौ १३ गुरुशनी
१४ शुक्रशनी १५ एवं द्विविकल्पा दश अथ त्रिविकल्पाः कुजबुधजीवाः १६ कुजबुधगुरुशुक्रा
१७ कुजबुधशनयः १८ कुजगुरुशुक्राः १९ कुजगुरुशनयः २० कुजशुक्रशनयः २१ बुधगु
रुशुक्राः २२ बुधगुरुशनयः २३ बुधशुक्रशनयः २४ गुरुशुक्रशनयः २५ एवं त्रिविकल्पा दश
अथ चतुर्विकल्पाः कुजबुधगुरुशुक्राः २६ कुजबुधगुरुशनयः २७ कुजबुधशुक्रशनयः २८ कु
जगुरुशुक्रशनयः २९ बुधगुरुशुक्रशनयः ३० एवं चतुर्विकल्पाः पंचविकल्प एकः ३१ एवं
मेकत्रिंशत्सुनफायोगाः अनेनैव विधिना चंद्राद्द्वादशगैरनफायोगा एकत्रिंशत् अथ
दुरधरायोगा विकल्पाः तत्र प्रस्तारभावात् क्रमशोभिनीयेति न्यायेन व्युत्पत्तिः एको द्वि
तीय द्वादशे द्वितीयः द्वितीये एको द्वितीयो द्वादशे भौमबुधौ १ बुधभौम २ कुजगुरु ३ गुरुकुजौ ४
कुजशुक्रौ ६ शुक्रकुजौ ७ शनिकुजौ ८ बुधगुरु ९ गुरुबुधौ १० बुधशुक्रौ ११ शुक्रबुधौ १२ बुधश॰ एम॰

नी १३ शनिबुधौ १४ गुरुशुक्रौ १५ शुक्रगुरू १६ गुरुशनी १७ शनिगुरू १८ शुक्रशनी १९ शनिशुक्रौ
२० अथैको द्वितीये द्वौ द्वादशे चैकः तद्यथा कुजो बुधजीवौ १ बुधजीवौ कुजः २ कुजबुधशुक्रौ ३
बुधशुक्रौ कुजः ४ कुजो बुधशनी ५ बुधशनि कुजः ६ कुजो गुरुशुक्रौ ७ गुरुशुक्रौ कुजः ८ कु
जो गुरुशनी ९ गुरुशनि कुजः १० कुजः शुक्रशनी ११ शुक्रशनि कुजः १२ बुध कुजगुरू १३
कुजगुरु बुधः १४ बुधः कुजशुक्रौ १५ कुजशुक्रौ बुधः १६ बुधः कुजशनी १७ कुजशनि बुधः
१८ बुधो गुरुशुक्रौ १९ गुरुशुक्रौ बुधः २० बुधो गुरुशनी २१ गुरुशनि बुधः २२ बुधः शुक्रश
नी २३ शुक्रशनी बुधः २४ गुरुः कुजबुधौ २५ कुजबुधौ गुरु २६ गुरुः कुजशुक्रौ २७ कु
जशुक्रौ गुरुः २८ गुरुः कुजशनी २९ कुजशनी गुरु ३० गुरुर्बुधशुक्रौ ३१ बुधशुक्रौ गुरु ३२
गुरुः बुधशनी ३३ बुधशनी गुरुः ३४ गुरुः शुक्रशनी ३५ शुक्रशनी बुधः ३६ शुक्रः कुजबुधौ
३७ कुजबुधौ शुक्रः ३८ शुक्रः कुजगुरुः ३९ कुजगुरु शुक्रः ४० शुक्र कुजशनी ४१ कुजश
नी शुक्रः ४२ शुक्रो बुधगुरु ४३ बुधगुरु शुक्रः ४४ शुक्रो बुधशनी ४५ बुधशनी शुक्रः ४६ शु

क्रौ गुरुशनी ४७ गुरुशनीभृङ्गाः ४८ शनिकुजबुधौ ४९ कुजबुधौ शनी ५० शनिकुजगुरुः ५१
कुजगुरुशनिः ५२ शनिकुजभृङ्गौ ५३ कुजभृङ्गौ शनिः ५४ शनिः बुधगुरु ५५ बुधगुरुशनी
५६ शनिबुधभृङ्गौ ५७ बुधभृङ्गौ शनिः ५८ शनिर्गुरुभृङ्गौ ५९ गुरुभृङ्गौ शनी ६० एवमेकत्रजा
ताश्चशीतिः ८० अथैको द्वितीये द्वादशे त्रयः द्वादशे एकः तद्यथा कुजो बुध भृङ्गाः १ बुधगुरुभृ
ङ्गाः कुजः २ कुजो बुधगुरुशनयः ३ बुधगुरुशनयः कुजः ४ कुजो बुधभृङ्गशनयः ५ बुध
भृङ्गशनयः कुजः ६ कुजो गुरुभृङ्गशनयः ७ गुरुभृङ्गशनयः कुजः ८ बुधः कुजगुरुभृङ्गाः
९ कुजगुरुभृङ्गा बुधः १० बुधकुजगुरुशनयः ११ कुजगुरुशनयो बुधः १२ बुधः कुजभृ
ङ्गशनयः १३ कुजभृङ्गशनयो बुधः १४ बुधगुरुभृङ्गाः शनयः १५ गुरुभृङ्गशनयो बुधः
१६ गुरुः कुजबुधभृङ्गाः १७ कुजबुधभृङ्गा गुरुः १८ गुरुः कुजबुधशनयः १९ कुजबुध
शनयो गुरुः २० गुरुकुजभृङ्गशनयः २१ कुजभृङ्गशनयो गुरुः २२ गुरुर्बुधभृङ्गशन
यः २३ बुधभृङ्गशनयो गुरुः २४ भृङ्गः कुजबुधगुरवः २५ कुजबुधगुरवः भृङ्गः २६ भृ

क्रः कुजबुधशनयः २७ कुजबुधशनयः भृगुक्रः २८ भृक्रः कुजगुरुशनयः २९ कुजगुरुशनय
भृक्रः ३० भृक्रो बुधगुरुशनयः ३१ बुधगुरुशनयो भृक्रः ३२ शनिः कुजबुधगुरवः ३३ कु
जबुधगुरवः शनिः ३४ शनिं कुजबुधभृक्राः ३५ कुजबुधभृक्राः शनिः ३६ शनिः कुजगुरुभृक्रा
३७ कुजगुरुभृक्राः शनिः ३८ शनिर्बुधगुरुभृक्राः ३९ बुधगुरुभृक्राः शनिः ४० एवमेकत्रिं
शदुत्तरं शतम् १२० अथ द्वितीये एकः द्वादशे चत्वारः चत्वारो द्वितीये द्वादशे चैकः तद्यथा कुजो
बुधगुरुभृक्रशनयः १ बुधभृक्रशनयः कुजः २ बुधः कुजगुरुभृक्राः शनयः ३ कुजगुरुभृक्राश
नयो बुधः ४ गुरुः कुजबुधभृक्राः शनयः ५ कुजबुधभृक्रशनयो गुरुः ६ भृक्रः कुजबुधगु
रुशनयः ७ कुजबुधगुरुशनयः भृक्रः ८ शनिः कुजबुधगुरुभृक्राः ९ कुजबुधगुरुभृ
क्राः शनिः १० एवं त्रिंशदुत्तरं शतं १२० अथ द्वौ द्वावेव द्वितीये द्वौ द्वितीये द्वावेव द्वादशे
यथा कुजबुधौ गुरुभृक्रौ १ गुरुभृक्रौ कुजबुधौ २ कुजबुधौ गुरुशनी ३ गुरुशनी कुजबुधौ
४ कुजबुधौ भृक्रशनी ५ भृक्रशनी कुजबुधौ ६ कुजगुरुभृक्रः बुधौ ७ भृक्रबुधौ कुजगुरु ८

ज्या॰ दी॰ ५३

कुजगुरुबुधशनी ९ बुधशनीकुजगुरु १० भृगुशनीकुजगुरु ११ कुजभृगुबुधगुरु १३ बुध
गुरुकुजभृगु १४ कुजभृगुबुधशनी १५ बुधशनीकुजभृगु १६ कुजभृगुगुरुशनी १७
गुरुशनीकुजभृगु १८ बुधगुरुकुजशनी १९ कुजशनीबुधगुरु २० कुजशनीबुधभृगु
२१ बुधभृगुकुजशनी २२ कुजशनीगुरुभृगु २३ गुरुभृगुकुजशनी २४ बुधगुरु
भृगुशनी २५ भृगुशनीबुधगुरु २६ बुधभृगुकुजशनी २७ कुजशनीबुधभृगु २८
गुरुभृगुबुधशनी २९ बुधशनीगुरुभृगुकुजभृगु ३० एवमेकत्रपञ्चोत्तरशतं १६० अथ
द्वौ द्वितीये त्रयो द्वादशे त्रयो द्वितीये त्रयो द्वादशे त्रये द्वितीये द्वौ द्वादशे तद्यथा कुजबुधौ गु
रुभृगुशनयः १ गुरुभृगुशनयः कुजबुधौ २ भृगुजीवौ बुधभृगुशनयः ३ बुधभृगु
शनयः कुजजीवौ ४ कुजभृगू गुरुशनयः ५ बुधजीवबुशनयः कुजभृगू ६ कुजश
नि बुधगुरुभृगवः ७ बुधगुरुभृगवः कुजशनी ८ बुधगुरुकुजभृगुशनयः ९ कुजभृगुश
नयो बुधगुरू १० बुधभृगू कुजगुरुशनयः ११ कुजगुरुशनयो बुधभृगू १२ बुधशनीकुजगुरु एस॰

शुक्राः १३ कुजगुरुशुक्राः बुधशनी १४ गुरुशुक्रौ कुजबुधशनयः १५ कुजबुधशनयो गुरुशु-
क्रौ १६ गुरुशनी कुजबुधशुक्राः १७ कुजबुधशुक्राः गुरुशनी १८ शुक्रशनी बुधगुरुकु-
जाः १९ बुधगुरुकुजाः शुक्रशनी २० एवमेकत्राशीत्युत्तरं शतम् १८० दुरधरायोगाः ४
सुनफानफयोः फलं शालिन्याह स्वयमेति · स्वोपार्जितधनः नृपस्तत्तुल्यो वा बुद्धिवित्त-
कीर्तिभिर्युक्तः ईदृशः सुनफायोगो भवति अप्रतिहतारातिः नीरोगदेहः विनयादिगुणाढ्य-
तः प्रथितयशाः राज्यादिविषयोपयुक्तः सुखयुतः अनफेपालंकाएलेरस्यैवः निर्दिष्टो
मनोदुःखहीनः ईदृगनफायोगो नरः ५ दुरधराकेमद्रुमयोः फलं वसन्ततिलकेनाह उत्पन्ने
ति यत्र ततो मन्त्रैर्भोगैः सुखयुतः धनैरश्वादिभिरनेकैर्युक्तः दाता समीचीनसेवकः
ईदृक् दुरधराजः स्यात् मलिनवासाः दुःखोत्यकुलोचितकर्मकृत् निर्धनः परकर्मकृन्
निर्धनः परकर्मकृत दुःखस्वभावः नृपसुतेऽपि केमद्रुमे ईदृशः स्यात् ६ सुनफाहीनासा
मान्यफलम् । अथ ग्रहभवनशाद्विशेषफलमाह — उत्साहेति उद्योगशीलः एणद्रिपः धनी

वृ.जा.टी.
५४

अस्मीस्थितकारी कुजे योगकर्तरि द्रवति १ क्षः शोभनवाक् नृत्यचित्रपुस्तकलिपिकुशलः
बुधे योगकर्तरि दृश्यते २ धनी धर्मी गुरौ राज्यमान्यः गुरौ योगकर्तरि दृष्टे ७ शनैश्च
रे योगकर्तरि चन्द्रे दृश्यादृश्ये च जातस्य फलं पुष्पिताग्रयाह परविभवेति परार्जिता मेभ्व
याणां गृहवस्त्राद्यानां नादिपरिवारेण भोक्ता नानाकार्यकर्ता बहूनां स्वामी शनौ योगक
र्तरि दृष्टे एवं धात्विग्रहे योगकर्तरि ग्रहाणां फलं वाच्यं अग्रे द्रष्टव्य इति चंद्रादिने दृश्यमूर्तिः
सप्तमादिभावषट्कगतोऽनिष्टकरो ह्यारिष्टा मादिकर्ता गलितत्वरदृश्य शरीरो लग्नादि
भावगतं शुभऐश्वर्यादिप्रदः अन्यथा प्रकारान्तरेणान्यतो विपरीतं दृष्टवाच्यं अथ समर्थः
रात्रौ जन्मन्यदृश्ये चन्द्रे चन्द्रोऽशुभः दृश्य चक्रार्द्धगतः शुभ इति ८ लग्नाच्चन्द्राद्वा
पचयगतानां सौम्यानां फलमयसनन्तिलकेनाह लग्नादिति यस्य जन्मनि लग्नादुपचयस्था
बुधगुरुसिता स्वयोषिद्भ्यः सोऽन्यधनी चन्द्रादुपचयगे स्ते ह्रीनी लग्नाच्चन्द्राद्वा द्वावुपचय
गौ तदा मध्यमधनः नातिबहुधनो नात्यल्पधन इत्यर्थः तदनन्तरं पापालग्नाच्चन्द्राद्वा केन्द्रस्थित एम०
समो १

पचयगे त्वधनी किंचिद्धनवानित्यर्थः अर्थादेव लग्नाद्बुधस्ताद्वोपचये सौम्यहीने निर्द्धनः अन्येषु
शुभाशुभविषमाने ष्वपि ३ २ वा तुल्येषु वाच्यं अयमर्थः लग्नाच्चन्द्राद्वोपचयगाः सौम्याः क्षेम
शुभाद्यशुभफलमभिभूय शुभमेव प्रधान्येन ददुरिति ६ इति श्रीमहीधरकृते बृहज्जातके वि
वरणे चन्द्रयोगाध्यायस्त्रयोदश १३ अथ द्विग्रहयोगाध्यायः तत्र रवौ चंद्रादियुक्ते फलं
शार्दूलविक्रीडितेनाह तीक्ष्णांशुरिति रविचन्द्रयुतौ यन्त्राश्माणां पाषाणानां क्रियासु कुशलं नरं कु
रुते कुजयुतः पापिनं बुधेन युक्ति क्रियासु कुशलं बुद्धियशःसुखयुतं च २ गुरुयुतो विषम
स्वभावं परकर्म्मकरं च ४ भृगुयुतो मल्लादिक्रियया बहुधा युधे अस्त्रप्राप्तधनं ५ शनियु
तो धातुयुतात्माद्युत्पत्तिक्रियासु गेरिकादि पाषाणभाण्डकराः समुद्रकारयन्ते वा कुश
लं कुरुते १ कुजादियुतचन्द्रफलमाह कूटेति कूटस्त्री नियगपण्यनियस्य तं कूटपण्य द्रव्याणां
प्रतिरूपक्रियपरा विक्रयशीलं नार्या मध्यस्य कुंभानां च विक्रयशीलं करं जननी द्रोहकरं च
कुजयुतश्चन्द्रः कुरुते प्रियंवदं कार्ये कुशलं यनवल्लभं यशस्विनं बुधयुतश्चन्द्रः रिपुजेता

रंवंशप्रधानंचफलंधननाथंसचगुरुश्चन्द्रः यासंसांख्यिपातेनिपुणंतंनु वायं आदिपदात्सीववरं
जनक्रयेविक्रयेष्वपिकुशलंभृकुपुतश्चन्द्रः ४ यास्वैरिणीपापत्तिंहित्वासवर्णा कामतः श्रयेत् अ
क्षताचक्षताचैवपुनर्भूः संस्कृतापुनरिति पुनर्भूलक्षणंतत्फलंशनिपुतश्चन्द्रः कुरुते २ भुयादि
पुतस्यभौमस्यफलंस्रग्धारयाह मूलहीति मूलंफलंपुष्पयत्फलैस्तैलाद्यैः कूटैः कृतिमद्यैर्व्यवहा
रकेनोवाणिज्यनिपुणोनिपुःकुशलश्चकुजेबुधपुतेनगरेऽधिकःकृतः एजायालब्धधनोविप्रो
वागुरुभक्तेकुजेभृगुतोमिथ्याप्रतिज्ञाकर्तानिंदितो ३ स्वपापुत्रकशनिपुतेकुजेभवति ३ गुर्वा
दिपुतबुधस्यपञ्चकादिपुत्रगुणेश्चफलंशार्दूलविक्रीडितेनाह सोम्येति रङ्गवरैःमल्लादिकगा
नवल्लभः नर्त्तनेकुशलश्चगुरुपुतेबुधेमदः शनिः शोभनविद्यापुत्रः धनफलत्रपुत्रः विन
[illegible]गुणालश्चभृगुपुत्रेगुरौनापितः कुंभकरोवास्वपकारोवाशनिपुतेगुरौतेयः ५ शनिपु
त्रभृगुफलंचपञ्चचित्रागमयाह आसितेति मंदनेत्रः स्त्रीणामाश्रयेणलब्धधनः लिपिरक्षरविन्या
सः पुस्तकेवाकर्मचित्रमालेरूपंतेषांज्ञाताईदृशः शनिपुतेभृगौभवतिकथितेति ५ मन्तोधिक

६

योगेपि उत्कृष्टफलं कल्प्यं यथा रवीन्दुकुजयोगे रवीन्दुयोगे यत्फलं रविकुजयोगे यत्फलं चन्द्रकुजयो
गे च यत्फलं तत्त्रयमपि वाच्यं एवं राशिद्वये द्विग्रहयोगे । च सर्वाणि फलानि वाच्यानीत्यर्थः ५१
इति श्रीमहीधरकृते जातकविवरणे द्विग्रहयोगाध्याय श्चतुर्दशः ॥१४॥ अथ प्रव्रज्यायोगाध्यायः
तत्रादौ चतुरादिग्रहैरेकस्थैः प्रव्रज्या शार्दूलविक्रीडितेनाह एकस्थैरिति यत्रतत्रराशौ चत्वारः
पंचषट्सप्त वा एकस्थाः ग्रहाः सर्वे बलहीनास्तदा प्रव्रज्यो न भवति चतुरादीनामेकगानां
मध्यादेकोपि बली तदैव प्रव्रज्याप्रदा ग्रहयो बलिनस्तद्वशः प्रव्रज्याः स्युः एवमेकस्थेष्वनु
रादिभिर्बलिभिः प्रव्रज्यायोगाः तेभ्य एव परबलपतेर्महेयादिभिः शाक्यादयः क्रमात्स्युः अ
यमर्थः चतुरादीनामेकस्थानां मध्यात्कुजे बलिनि शाक्यो रक्तपटो बौद्धो वाच्यः १ बुधे स
बले आजीवकः एकदण्डी २ गुरौ सबले भिक्षुस्त्रिदण्डी ३ चन्द्रे सबले वृद्धः श्रावकः कापालिकः
४ रक्तमंगभपात् आवकपदलोपः भृगौ सबले चरकः चक्रधरः ५ शनौ शबले निर्ग्रन्थः
क्षपणकः ६ रवौ सबले वन्याशनः मूलफलाशनस्तपस्वी ७ एवं बलवद्ग्रहतुल्या प्रव्रज्या

व·ज्जा·टी·
५९

ज्ञेयावक्रुष्टबलवत्सुबलाधिक्यक्रमेणपणजितैरितिशक्यादिप्रव्रज्यात्यागिभिरन्यग्रहेरन्यग्र
हपणजितैः प्रव्रज्याच्युतिर्याच्याग्रहोक्ता प्रव्रज्यामादाय पुनस्त्यजतीत्यर्थः १ अत्रैव विशेषवे
तालीयेनाह रविलुप्तेति चतुरादीनामेकस्थानां पापवन्तो बलिनः नावतः प्रव्रज्याप्रदास्युक्तं तथा
पिबलिनां मध्ये यावन्तो जमिनाते स्वप्रव्रज्यां नददाति किन्तु तद्भक्तमयः तत्प्रव्रज्यानां प्रव्र
जितानां भक्तिभाजो भवंति अभियाचितेति बलिभिर्निहितैः ग्रहयुद्धे अन्यपुत्तैः अन्यग्र
हदृष्टोऽभियाचितमात्रेण दीक्षिताः दीक्षापार्थनपरेण तु दीक्षां प्राप्नुवन्तीत्यर्थः ननु प
णजितैः पूर्वप्रव्रज्याप्रच्युति रुक्ता अत्र पुनः प्रव्रज्यापार्थनं मुच्यत इति विरोधः उच्यते बली
ग्रहो ग्रहयुद्धेऽन्येनजितः सन्न केनापि दृश्यते तदा प्रव्रज्यां गृहीत्वा त्यजति यदा जितोऽप्य
न्येन न दृश्यते तदा प्रव्रज्यामर्थयमानोपि नाप्नोतीति सा च प्रव्रज्या बलिनो न दृशायां स्यात्
तद्दलम् दीक्षादानसमर्थो भवति यदा बले न संयुक्तः तस्यैव दशाकाले दीक्षां लभते न ऐवश्य
मिति ९ अथ चतुरादिभिरेकैर्विना प्रव्रज्यायोगं शालिन्याह जन्मेशस्येति नरजन्मकालेयदा एग०

शोचंद्रलग्नराशीशो जन्मेशाः स्वस्थस्थैः इदृष्टं शनिं पश्यति तदाप्रव्रज्यायोगः सद्यमातिज
न्मेशयोर्वलीत त्वं वर्धीत क्रमाद्दृशायां च तदुक्तम् जस्सअपि पञ्जाइको लं जन्मेशनाहोग
हेहिअणदिक्कोतस्सस अइहिक्लत्नं वलिनदशाहोइ नह्यालं अयमर्थः यस्पक्षेक्षति शाषिजन्म
पतिम होरदृष्टनस्पदीक्षालानं वलिनोदशायां भवतिनत्वालमिति आर्कृति शनिर्वल
हीनं जन्मेशं यापश्यति तदा शानुक्त प्रव्रज्यानदुक्तं कोणास्सविद्दिक्काणो जइहोइसलीतदं
शगअोवक्केसेवाहिट्ठो कोणो णसवदंसगलो विमुत्को अपमर्थः कोणस्यापि इच्छाणो
पहिभवति शशीतं दृशागः वक्रोशेवादृष्टः कोणो नसर्वदृर्शनविमुक्तइति २ यद्योगेए
जात्पिहीक्षितः स्यात योगद्वयं मालिएयाह सुरगुर्विति गुरुचन्द्रजन्मलग्नेषु शनिदृष्टेषु
नवमे च गुरौ राजयोगे इर्वी केपाताल्पया कृतशास्त्रकृती क्षितिः स्यात् तदुक्तं गुरुसमेसि
लग्नदृष्टाः कोणे न च नवमगो यदि जीवः नरनाथयोगजातः शास्त्रकारी भवति न च नृपतिः
द्वितीयमाह नवमेति अन्यग्रहदृष्टे शनौ नवमे नृपयोगे जातो एजर्षि क्षितो भवति एनयो

गाभावेऽन्योपि दीक्षामाप्नोति तदुक्तं अथ नवमस्थाने सौरिः पदि स्थितः सर्वदर्शनविप्रक्तः नर
नाथयोगजातोऽन्योपि सन् दीक्षितो भवति न च योगाभावे योगेऽस्मिन् दीक्षितो नरो जातः
निःसंदिग्धं प्रव्रज्ये योगस्याप्यभावे लोति ४ इति महीधरकृते जातकविवरणे प्रव
ज्याध्यायः पञ्चदशः ॥१५॥ अथ राशिशीलाध्यायः चंद्रभुज्यमाननक्षत्रशीलं च
तुर्दशार्याभिराह अश्वभूषण इति मण्डनवल्लभः शोभनाकारः जनप्रियः कार्यदक्षः
बुद्धिमान् ईदृग् अश्विनीजातः बहुवचनं तारकापेक्षया शास्त्रकर्मणो मागतं इष्ट
त्यवादी चतुरः सुखी ईदृग् भरणीजातः १ बहुभुगिति प्रभूताहारः परस्त्रीरतः तेजस्वी अ
हिष्णुः जनप्रसिद्धः ईदृक् कृत्तिकाजात इति अवितथभाषी पास्त्रोक्तस्थिरबुद्धिः कर्ता मधुर
वाक् निश्चलबुद्धिः सुंदरः ईदृग् रोहिणीजातः २ चपल इति क्रियास्वनवस्थितः दक्षः भ
याकुलः प्रियवक्ता उद्यमी वित्तवान् भोगशीलः ईदृक् मृगशिरोजातः शठः परकार्यविमु
खः तदुक्तम् मनसा वचसा यश्च दृश्यते कार्यतत्परः कर्मणा विपरीतश्च स शठः सम्मितः

नेइति मानी कृतज्ञः सुकृतं हंतीति कृतघ्नः बंधपरः पापकृत् ईदृग्गार्द्रीजः ३ हालेति तपःक्लेशास
हः सुखभाक् शोभनशीलः जडः व्याधिमान् तृषार्तः स्तोकार्थेन संतुष्टः ईदृक्पुनर्वसुजः
शांतात्मेति जितेन्द्रियः जनप्रियः शास्त्रवित् वित्तवान् धर्मरतः ईदृक्पुष्यजः परकार्य
विमुखः सर्वभक्ष्यः स्वप्नशीलः रौद्रो निर्दयः पापरतः अतपकृतिरोः पंचकंउतंच मुखेप
महत्ताकारं वाचावंदनशीलता हृदयंकृतेरी वृत्तेत्रिविधं धृतेलक्षणाइति ५ बहुभृत्ये
ति बहुसेवको बहुधनः भोगभाक् देवपितृभक्तिमान् महोत्साहः ईदृग्मघाजः प्रियभाषी
दानशीलः कांतियुक् भ्रमणशीलः राजसेवातत्परः ईदृक्पूर्वाजः ६ सुभगइति जनप्रियः
विद्ययाप्राप्तधनं येन भोगयुत सुखी ईदृगुत्तराजः उद्यमी निर्लज्जः मद्यपः दयालुः चोरः
ईदृग् हस्तः ○ चित्राम्बरेति नानाविधिशास्त्रपुष्पधारी शोभननेत्रावयवः ईदृक्चि
त्राजः विनयो विक्रयो वित्तदयालु अभिमतभाषी धर्मरतः ईदृक्स्वातौ ८ ईर्षुरिति पर
वृद्धिमत्सरी लोभाभिभूतः सुरूपः सुभाषणदक्षः विनोधकृत् ईदृग्विशाखाजः ईश्वरः पर

ब॰ जा॰ टी॰
५८

देशावसनशीलः क्षुधापीडासहनः श्रमणः ईदृगनुराधाजः ९ ज्येष्ठास्विति स्वल्पसुहृत्संतोषी
धर्मरतः भूरिरोषः ईदृग्ज्येष्ठाजः गर्वितः सुबहुधनः सुखवान् हिंसा [illegible] निवृत्तः एकम
तिः भोगरतः ईदृग्मूलजः १० इष्टानंदिति रूपमभिमतमानंदजनकं च कलत्रपक्षसः ग
र्वितः स्थिरप्रेमा ईदृक्पूर्वाषाढजः विनयो धर्मज्ञः प्रभूतसुहृत् उपकारवित् जनप्रियः ई
दृगुत्तराषाढजः ११ श्रीमानिति श्रीयुतः पण्डितः शोभनश्लोकः धनीजनविदितः ईदृक्
श्रवणजः ईश्वरः रणप्रियः गीतवल्लभः अर्थरुचिः ईदृक्धनिष्ठाजः १२ अस्फुटवागि
ति स्पष्टवचनः स्त्र्यादिव्यसनोपहतः शत्रुघातकः असमीक्षितकार्यकृत् [illegible] ईदृक्
शतभिग्जातः दुःखितमनाः नारीपरिभूतः धनीप्रवक्ता धनपटुः इति पाठे स्त्रीभिर्जि
तं धनं यस्य यद्वा धनपटुः धनार्जने चतुरः ३ निधनसंचयकरः ईदृक्पूर्वाभाद्रप
दाजातः १३ वक्तेति भाषणदक्षः सुखयुतः बहुपुत्रपौत्रः जितारिः धर्मशीलः ईदृगुत्तराजः
संपूर्णाङ्गावयवः जनप्रियः रणप्रियः परधनादिषु लुब्धः धनी ईदृग्रेवतीजः एतेन त्वत्र स्वभा

एम॰
५८

वर्ग्गंद्वे सबले पूर्णाः सप्तमे मध्यमे अबले ऽल्पाः १४ इति श्रीमहीधरकृते जातकविवरणे नक्षत्रशीला
ऽध्यायः षोडशः १६ अथ मेषादिराशिगतचंद्रफलानि सप्तशार्दूलविक्रीडितेनाह वृत्तेति वर्तुलेर
क्तनेत्रे यस्य सः उष्णभोजी शाकभोजी शीघ्रप्रयाणी इति अग्रगण्यः रतिप्रियः निर्मांशो जंघो दृढसंधिः
चलधनः रणप्रियः स्त्रीप्रियः पराराधनकुशलः कुत्सितनखः भग्नमूर्द्धा गर्वितः आत्ममु
ख्यः गुणोत्पृथः शक्रादिचिह्नविशेषेण हस्ततले [illegible]श्चिह्नितः क्रियासनवाञ्छितः जले
शभयः ईदृक्मेषस्थे चन्द्रे जातो भवति १ कान्त इति सुंदरः विलासगामी विस्तीर्णोरुमुखः
पृष्ठमुखपार्श्वेषु चिन्हवान् दाता कष्टर्ज्जनासमर्थः अप्रतिहताज्ञः उन्नतस्कंधः स्त्रीजनकः कफ
प्राधिकः प्रथमजैः पुत्रैः वैर्वित्तैः पुत्रैश्च रहितः जनप्रियः दृढमित्रः क्षमावान् प्रतिज्ञाप्रा
नः स्त्रीप्रियः दृढमित्रः यौवने वार्द्धके च सुखी अर्थाद्वितीयावस्थेऽपि ईदृक् वृषस्थे चन्द्रे जा
तः २ स्त्रीलोल इति नारीष्वभिलाषुकः कामशास्त्रकुशलः रक्तनेत्रः पण्डितः परसंदेशप्रा
पकः कुटिलकेशः चतुरधीः हास्यचेष्टितद्यूतानि वेत्तीति सुंदरदेहः मधुरभाषी बहुभक्षणनरतः

नतरुः षंढैः सह प्रीतिमान् उन्नतनासिकः ईदृङ्मिथुनगे चन्द्रे जातः ३ आवक्रेति कुटि
लशीघ्रगामी उच्चजघनः प्रमदाभिभूतः शोभनमित्रः ज्योतिशास्त्रवेत्ता बहुगृहः चंद्रवत्
क्षयेणाप्यनेन च युज्यते कदाचिद्धीनो कदाचिल्लिर्द्धनः इत्यर्थः वामनः स्थूलकंठः सांत्वैः प्री
तिं प्रयाति मित्रेष्वनुरक्तः जले उद्याने च प्रीतिमान् ईदृग्कर्कगे चन्द्रे जातः ४ तीक्ष्ण इति।
अमर्षशीलः वृहत्कपोलः विस्तीर्णमुखः कपिलनेत्रः स्वल्पापत्यः प्रमदाद्विट् प्रियमांस
वनपर्वताश्रयः निःकारणकोपशीलः बुभुक्षापिपासाजनउदरदर्शनचित्तैः रुग्जरोगेपी
डितः दाता पराक्रमी एकचित्तः अभिमानी वश्यः ईदृक्सिंहगे चन्द्रे जातः ५ व्रीडेति ल
ज्जासस्याभ्यां मनोहरे ईर्शनगमने यस्य सः शिथिलस्कन्धः शिथिलभुजश्च सुखपुत्रः म
दुत्यक् सत्यभाषी गीतवाद्यप्रभृत्य पुस्तकादिकलासु चतुरः पण्डितः धर्मरतः बुद्धिमान्संभो
गलालसः परकीयैर्वेश्मभिर्द्धनैश्च युतः अन्यदेशवासी प्रियभाषी स्त्रीजनकः स्त्रीसंतानः
ईदृक्कन्यास्थे चन्द्रे जातः स्यात् देवेषि देवानां विप्राणां सतां च पूजने तत्परः मेधावी तनुले अ एम-

तीतानां स्मृतिमेधाबुद्धिज्ञानकालवेदिनी शुभाऽशुभविचारज्ञः प्राज्ञैः प्राप्तउदाहृतम् ६ इतिश्रोत्रि
यः नारीवशः उग्रः उच्चघ्राणः दुर्बलशिथिलशरीरः भ्रमणशीलः धनी अपरिद्वेर्णी वप
वः रूपविक्रयाभिज्ञः देवद्विजानामासुरप्रयां वद्धितापं नामपस्पस्पः रोगवान्स्वजनावाद्दि
तकारी तेर्वधुभिर्विभूषितोऽसत्सत्यक्त ७ इहतुलास्थे चन्द्रे जातः ७ वृश्चिकस्थे चंद्रफलं
मालिएपाह स्थूलेति विस्तीर्णनेत्रवक्षः स्थूलेपस्पसः वर्तुलजंघे ऊरुपस्प मातपितृ
भ्यां उपदेशकरै भ्रमलकः वाल्यरोगी एजकुलेमान्यः कपिलः विषमस्वभावः मीनवज्रप
क्षिणोः अकांक्षि न्हानि हस्ताहोपस्पसः गुप्तपापः ६ इह वृश्चिकगे चन्द्रे जातः ८ धनुर्गग
योः फलं शार्दूलविक्रीडितेनाह दीर्घेति दीर्घमुखग्रीवः पितृसंवंधिधनेनयुक्तः दाताका
व्यकृत् वलवान्भाषणशीलः स्थूलदन्ताकरौ ओष्ठो नासिका च पस्पसः कार्यवृध
मीलिपिपुस्तकचित्रज्ञः नलस्कंधः कुत्सितनखः पीनवाहुः धार्मिकः धर्मज्ञः वा
धवेद्वेष्टा हठाद्वशं न याति सान्त्वेनैव वश्यः ६ इह धनुस्थे चन्द्रे जातः ९ नित्यमिति सर्वदाम्मी

यान्पुत्रकलत्रावाणधपतिर्दांभिकः अधोभागे दुर्बलः शोभननेत्रः कृशजघनः उक्तमाह
कः यदुच्यते तन्नस्य कदेवगुरुहानीत्यर्थः सर्वजनप्रियः आलस्योपेतः शीतेन सहतो भ्रमणशी
लः उदारचेष्टः कविः लोभाभिभूतः अगम्यासु स्वगोत्राजासु निकृष्टजातिषु जएंगनासु च
वृद्धस्त्रीषु च प्रसक्तः निर्लज्जः निर्द्धनः ईदृङ्मनुजो मकरे चन्द्रे जातः १० कुंभगे चन्द्रफलं न
र्कुटेनाह करभेति उष्ट्रसमग्रीवः शिराव्याप्ता कर्कशा लोमवहुला अत्युन्नता तनुः शरीरं
यस्य विस्तीर्णौ पार्श्वौ सक्थिनी देहे पश्चिमभागो नितंबस्थानं सुखं बल्लिप्रजठरे
मूर्खः परनार्यां परधने पापे चासक्तः उपचयापचये पुष्पं क्रियाणि पुष्पं समालभने मित्रा
णि च यस्य मार्गे न श्रमः ईदृक् कुंभगे चन्द्रे जातः ११ मीनफलं मालिन्याह जलपरधनेति
जलोत्पन्नानां परधनानां च भोक्ता स्त्रीषु वस्त्रेषु च प्रेमवान् अन्यूनाधिकं सुदृढं च शरीरं चरु
रीरं यस्य सः उच्चनासिकः विस्तीर्णमस्तकः रिपुपराभवकारी प्रमदावश्यः शोभननेत्रः कां
तिनिधान धनानां भोक्ता शास्त्रविन् ईदृङ्मीनगे चन्द्रे जातो भवति १२ उक्ते राशिस्वरूपं अ राम०

मरविलसितेनाह वलवतीति चंद्रक्रांतराशौ तद्राशिनाथे चन्द्रे च वलिनि एवन्निष्वलवत्सुफ
लं पूर्णं भवति तेषां मध्यान्नद्वयोर्वलिनामध्य फलं एकस्मिन्वलिनि हीन फलं त्रयाणां
मवलत्वे प्रोक्तफलं किंचिन्नस्यात् अन्येपि रव्यादयश्चन्द्रवाच्चेतनीयाः अथ मर्पः पत्रराशौ
रविकुजादयः तद्राशौ तदीशो रव्यादौ च वलवति वत्समाणं फलं पूर्णं द्वेकयोर्मलिनीर्मध्य
मं त्रिष्ववलेषु न किंचित् इति १२ इति चंद्रराशिस्वभावः अथ मेषवर्गतार्कफलमोप
छंदसिकेनाह प्रथित इति विख्यातः दक्षः श्रमणशीलः स्वल्पधनः शास्त्रधारी ईदृग्मे
षगेऽर्के जातः परं त्वनुच्चांशे परमोच्चांशगेन तु श्रमणशीलः किंतु स्थिरैर्वहुधनः शा
स्त्रधारिभिः सेव्यश्चगणोति जातिवासोभिः सुगंधद्रव्यैः पण्यैश्च जीवति स्त्रीद्वेषा
गीतयाघेच दक्षः ईदृग्वृषेऽर्के जातः १३ मिथुनादिचतुष्टयार्कफलं शार्दूलविक्रीडिते
नाह वेघेति पण्डितः ज्योतिः शास्त्रवेत्ता ईदृङ्मिथुनगेऽर्के उन्नो निरपेक्ष इत्यर्थः
निर्धनः अन्यकार्यकर्ता खेदेनमार्गेण दुःखेश्च सदा युक्तः ईदृक्कर्कार्के अरण्येपर्वतगो

ऐश्चप्रीतिर्यस्य स तद्वाशशीलइत्यर्थः यतीमूर्खः ईदृक् सिंहगेऽर्के लिपिरक्षरन्यासः ले
ख्यं चित्रकर्मकवित्वं गणितशास्त्र विज्ञाने च तैर्युक्तः नाएितुल्यशरीरः २ ईदृक् कन्या
र्के १५ तुलाह्निचन्द्र फलं शार्दूलविक्रीडितेनाह जातइति मयविरूपी पथि घातसक्त
सुवर्णकारः अनुचितकर्ता ईदृशस्तुलार्केउग्रस्वभावः असमीक्षितकार्यकर्त्ता विषमयो
गेनार्जितं धनं येन शस्त्रेणांतं नाशं गच्छतीति शस्त्रनिर्याण इत्यर्थः ईदृशोऽलिगेर्के
कुलानुचितकर्मकृत् मूर्खः कुत्सितवाणिज्यकर्त्ता स्वल्पवित्तः लोभी परभाग्येरतः
परार्थोपभोक्तेत्यर्थः ईदृशो मकरगेऽर्के १६ कुंभमीनार्कफलं चन्द्रार्कयोरेकराशिगयो
र्भलक्ष्म्यास्त्तां तं वसन्ततिलकेनाह नीचइति कुलाऽनुचितकारी पुत्रैर्जनवाल्लभ्येन च
विरहितः निर्द्धनः ईदृशः कुंभगेऽर्के जलोत्पन्नमणिमुक्ताप्रवालादिना स्वएपनतद्विक्रये
णा भैवर्त्तव्यं यस्य स्त्रीणां पूज्यः ईदृशो मीनगेऽर्के न हासमानवाणिज्यकृषः कालोनो
त्याहिनोक्तः तनुत्वेंगविभागे चन्द्रार्कपत्ये चिह्नं वदेत् अपमर्षा: चन्द्रार्कौ यद्राशावेकगौ ११ एम्०

शिः कालपुरुषे येषांगे पठितः तत्र मर्म तिलकादिचिन्हं वदेत् ।यथा मेषस्थयोश्च द्वार्कयोः शि
रसि वृषस्थयोर्मुख इत्यादि १७ इति राशिगोलम् अथ मेषवृश्चिकतुला वृषस्थकु
जफलं नर्कुटेनाह नरपतीति राजपूज्यः भ्रमणशीलः सेनापतिः क्रयविक्रयज्ञः धनी व्र
णितांगः न स्थिरः विप्रकीर्णद्रव्यः ईदृशो मेषालिगे कुजे स्त्रीजितः मित्रेषु क्रूरः परस्त्रीशक्तः
कपटो शोभनालङ्कारभयार्तः निःस्नेहः ईदृशो वृषतुलास्थे कुजे १८ मिथुनकन्याकर्क
गतकुजफलं वसन्ततिलकेनाह बौधेइति असहनशीलः तेजस्वी इत्यर्थः पुत्रयुक्तः मि
त्रहीनः परोपकारशीलः गीतज्ञः संग्रामनिष्णातः अरतो निर्भयः अर्थोपार्ज्जनपरः
ईदृशो मिथुनकन्यास्थे कुजे धनी जलयानेन नवादिना सम्यगार्ज्जितं धनं येन । यद्वा ज
लेन गमनेन चोपार्ज्जितधनः मेधावी अङ्गहीनः दुर्जनः ईदृशः कर्कगे कुजे १९ सिंह
धनुमीनमकरगे कुजफलं शार्दूलविक्रीडितेनाह निःस्व इति निर्द्धनः कर्दनासमः अ
रण्यमध्यचारी लोककलत्रः ह्रस्वापत्यः ईदृशः सिंहगे कुजे अनेकशत्रुः राजमंत्री न्यर्पितः

निर्भयः स्वल्पप्रजः ईदृशो धनुर्मीनगे कुजे नित्यदुःखी निर्द्धनः भ्रमणशीलः मिथ्याभाषी
निरपेक्षः ईदृशः कुंभगे कुजे बहुधनः बहुपुत्रः राजतुल्यो वा ईदृशो मकरगे कुजे २० इति कुज
राशिफलम् मेषवृश्चिकयवृतुलास्थे बुधे फलमाह द्यूतेति अक्षद्यूतानेव्यसने परस्वहर
णे मद्यपाने चासक्तः शास्त्रार्थदूषकः तस्करः दरिद्रः कुत्सितभार्यः दांभिकः अनृतभाषी
ईदृशो मेषालिगे बुधे उपदेष्टा बहुपुत्रः बहुस्त्रीकः वित्तोपार्जनरतः ईदृशो वृषतुलास्थे
बुधे २१ मिथुनकर्कगे बुधफलं दंभ्रुवज्जमाह विकत्थन इति वाचालोऽसत्यभाषी शिल्प
ज्ञः शास्त्रेषु कलासु च गीतनृत्यादिलिपिकर्मसु शिक्षितः प्रियभाषी सुखासक्तः ईदृ
शो मिथुनगे बुधे उदकेनार्जितं धनं जलार्जितेति पाठे स्ववीर्योपार्जितधनः स्त्रीप
उधजनस्य रिपुः ईदृशः कर्कगे बुधे २२ सिंहकन्यागतबुधफलमाह स्त्रीद्वे
ष्य इति योषितामनभिमतः निर्द्धनः दुःखी पुत्रहीनः भ्रमणशीलः मूर्खः वनिताभि
ते लाभी प्रेष्य आत्मीयेभ्यः परिभवोपहत्यमत्यर्थं नेरभिभूतः इत्यर्थः ईदृशः सिंहस्थे बुधे दाता

पण्डितः विद्याशौर्यादिबहुगुणयुक्तः सुखभाक् सहिष्णुः प्रयोगवेत्ता निर्भयः ईदृशः कन्यागते
बुधे २३ मकरकुंभधनमीनगे बुधफलं सौपष्ठं दसिकेनाह परकर्मकृदिति परप्रेष्यः नि
ह्नः शिल्पकर्मणि बुद्धिर्यस्य परस्वग्रहणशीलः निर्मूल्यकार्यकर्ता ईदृशो मकरकुंभगे
बुधे राजवल्लभः विद्वान् व्यवहारवेत्ता आप्तमनुकूल्यवाक्यपल्येति ईदृशो धनुःस्थे
बुधे जिताः सेवकायेन पराण धनकुशल इत्यर्थः कुत्सितशिल्पे ईदृशो मीनस्थे बुधे जा
तः २४ इति बुधराशिभावः मेषादिराशिगत गुरुफलं शार्दूलविक्रीडितेनाह सेनानीरि
ति सेनानायकः प्रभूतधनः प्रभूतभार्यः प्रभूतपुत्रः दानशीलः शोभनभृत्यः क्षमा
वान् तेजस्वी कान्त्या दारैर्भर्त्सेभिः गुणैर्विद्यादिभिरन्वितः कीर्तियुक्तः ईदृशो मे
षवृश्चिकास्थे गुरौ कल्पंनीरोगमंग यस्य कल्पो नातौ निरामयः कल्पो नीरोगदक्ष
योरिति चाभिधानात् सभूयः सखपलः सार्थोधनी समित्रो मित्रयुतः सतनयः
पुत्रान्वितः दाताजनवल्लभः ईदृशो वृषतुलास्थे गुरौ बहुपरिवारः बहुपुत्रः बहुमित्रः

साचिव्ये मंत्रित्वे निपुणः सुखयुतः ईदृशो मिथुनकन्यागते गुरौ २६ चांद्र इति मणिभिः पुत्रैः
धनैः कलत्रैः ऐश्वर्येण मेधया सुखेन च युक्तः ईदृशः कर्कगे गुरौ सेनाप्रधानः कर्कोक्तं फलं
रत्नादि धनबलं तत्फलं च सिंहस्थे गुरौ मण्डलाधिपतिः राजमंत्री सेनानायो धनवान् वा ईदृ
शो धनुर्मीनस्थे गुरौ कर्कोक्तफलं रत्नादिभावं तद्युतः कुंभगे गुरौ कुत्स्याऽन्वितः कास्वस्वध
नः दुःखार्तः ईदृशो मकरगे गुरौ २७ इति गुरुराशिभावः मेषादिवृषधनुर्तुलागतभृगुफलं पुष्पि
ताग्रयाह परयुवतीति परस्त्रीशक्तः नासां परस्त्रीणां पर्यवादे रपराधानु वचने रपहृतध
नः कुलकलंककृत् ईदृशो मेषालिगे भृगौ [illegible] श्रीमत्वीर्येण स्वबुध्या च धनं यस्य राज्यमानः
स्ववंधुत्वामी विरोधो ताभय वर्जितैः ईदृशो वृषतुलास्थे भृगौ २८ मिथुनकन्यामक
रकुंभगे भृगुफलमौपछंदसिकेनाह नयेति राज्यकार्यकर्ता धनी कलागीतवाद्यादि
कः वेत्ति ईदृशो मिथुनगे भृगौ निकृष्टकर्मकृत् कन्यागते भृगौ सर्वजनप्रियः प्रमदाव
शगः कुत्सितस्त्रियामनुरक्तः ईदृग् मकरकुंभगे भृगौ २९ कर्कसिंहधनुर्मीनगे भृगुफ॰ राज्य

लेशि त्रिविरिण्याह द्विभार्या इति द्विस्त्रीकः धनी सभयः प्रकृष्टमद ईदृशो कोपस्थानगाविनोत्तिदुः एवित
ष्म ईदृशो कर्कगे भुक्ते स्त्रीतः प्राप्तधनः प्रधानस्त्रीकः अल्पापत्यः ईदृशः सिंहस्थे भुक्ते ग
णोर्वहुश्रिः पूज्यः सधनः धनुःस्थे भुक्ते पण्डितः ईश्वरः राजा जनिता पूजा यस्य सर्वजनाना
मतिवल्लभः ईदृशो मीनगे भुक्ते २० इति भुक्तफलभावः मेषवृश्चिकमिथुनगते शनौ प्र
लंवसन्ततिलकेनाह मूर्ख इति अज्ञः भ्रमणशीलः दाम्भिकः मित्रवर्जितः ईदृशो मेष
गे शनौ वन्ध्यं वधं च भजते क्रियास्य न वस्थितः निर्दयः ईदृशो लिगे शनौ निर्गता ह्री सुखा
र्यतन पापस्य निर्लज्जः दुःखी दरिद्रः अपुत्र इत्यर्थः आलेख्यकर्मणि स्खलितो कुशलः
स्सापतिः रक्षकः मुख्यानां प्रधानानां पतिर्यो र्थः ईदृशो मिथुनकन्यास्थे शनौ २१ वृष
तुला कर्कसिंहगते शनौ फलं मन्दाक्रान्तयाह वन्द्यैति अगम्यस्त्रीणां वल्लभः स्वल्पैश्वर्यः
वहुदारः ईदृशो वृषगे शनौ विदितकीर्तिः समूहानां ग्रामाणां च मान्यः धनी ईदृश तुलायां
शनौ निर्धनः दन्तहीनः जननी वियुक्तः पुत्रहीनः मूर्खः ईदृशः कर्कगे शनौ दुर्जनः विमुख

य॰ जा॰ टी॰

६४

दुःखितो वित्तनयोः पुत्रः विच्छिन्नदारेशा कर्ता पारदारहरत्यर्थः ईदृशः सिंहगे शनौ ३२ धनुर्मीनम
करकुंभगे शनौ फलं शार्दूलविक्रीडितेनाह स्वोत्तम इति शोभनो न्यो मत्स्यर्थस्यासः अप्रमत्तः यद्वा
शोभनोन्यो वा ईदृक् कंपस्य वा ईके सुखीत्यर्थः एजगहे जातविश्वासः शोभनपुत्रः शोभनभार्यः शो
भनवित्तः नगराणां सेनापा ग्रामाणां च नायकः अल्पदृष्टिः मलोपेतः स्नानालसः इत्यर्थः स्थि
रवित्तः स्थिरैश्वर्यः भोगशीलः ईदृशो नरो मकरकुंभगे शनौ भवति ३४ इति शनिराशिस्व
भावः एवं राशिस्वभावा उक्तास्तत्रेदं बोध्यं राशौ राशीशे तत्र हे बलवति यथोक्तं फलं संपूर्णं भव
ति द्वयोरप्यबलयतो मध्यमो न नैकस्मिन्नपि दुर्बलवति न किंचिदिति अथ मेषादिलग्नेषु
जातस्य चंद्राक्रांतराशयुक्तस्य रूपादि देशं पूर्व्वोक्तानयाह स्थितिरेति चंद्रस्य मेषादिराशिसं
योगे स्वरूपमुक्तं वक्ता नाम्नैव गीत्यादितद्यपि मेषादिलग्नजातस्य फलं बोध्यं किंतु इदं फलं चंद्र
राशितो लग्नादि भावेष्वपि कल्पत् अत्र भावास्तन्वादयो भवनगुणो भावराशि गुणोनाथगुणोस्त
स्वामिगुणैर्विचार्याः भवनं भवनाधिपयोर्गुणाः सबलत्वं अयमर्थः लग्ने लग्नेशे च बलवति

एम॰

६४

जातस्य शरीरपुष्टिर्वाच्या धनभावगे शीतरश्मौ च सबले धनवृद्धिः एवं शेषेष्वपि लग्नादिभावेषु
तदीशेषु बलहीनेषु हानिर्वाच्या भवतन्नाथयोर्यद्येको बली तदा मध्यमा भाववृद्धिरिति ३५
इति श्रीमहीधरकृते बृहज्जातके नक्षत्रराशिशीलाऽध्यायः षोडशः १६ अथ दृष्टिफलाध्यायः
तत्र मेषादिगे चन्द्रे कुजादिदृष्टे जातस्य स्वरूपं शार्दूलविक्रीडितेनाह चन्द्रे भूपबुधाविति मेष
गे चन्द्रे कुजदृष्टे राजा बुधदृष्टे पण्डितः गुरुदृष्टे राजतुल्यः शुक्रदृष्टे गुणवान् शनिदृष्टे चौरः र
विदृष्टे निर्धनः वृषगते कुजदृष्टे दरिद्रः बुधदृष्टे चौरः गुरुदृष्टे राजश्रेष्ठः नृपमान्य इति पाठे
नराणां मान्यः नृपाश्रय इति पाठे नृपः वहासः ईशः शुक्रदृष्टे राजा शनिदृष्टे धनवान् रविदृष्टे
दासः मिथुनगे चन्द्रे कुजदृष्टे शस्त्रचित्रपः बुधदृष्टे पण्डितः शुक्रदृष्टे निर्भयः शनिदृष्टे वस्त्र
वपनकरः रविदृष्टे दरिद्रः कर्कगे चन्द्रे कुजदृष्टे युद्धकुशलः बुधदृष्टे काव्यकर्ता गुरुदृष्टे प
ण्डितः शुक्रदृष्टे राजा शनिदृष्टे शस्त्रोपजीवी रविदृष्टे नेत्रोपरोगी १ ज्योतिर्ज्ञ इति सिंहगे
चन्द्रे बुधे दृष्टे ज्योतिःशास्त्रवेत्ता गुरुदृष्टे ईश्वरः शुक्रदृष्टे राजा शनिदृष्टे श्मकर्म्मा रविदृष्टे राजा

कुजदृष्टे भूपः कन्यागते चन्द्रे बुधदृष्टे राजा गुरुदृष्टे सेनापतिः शुक्रदृष्टे सर्वकार्येषु सूक्ष्मदृष्टिः शनि
रविकुजान्यतमदृष्टे स्त्रियामाश्रिताजीवति तुलास्थे चन्द्रे बुधदृष्टे राजा गुरुदृष्टे हेमकारः शुक्र
दृष्टे क्रयविक्रयज्ञः क्रूरदृष्टिः प्राणघातकः वृश्चिकस्थे चन्द्रे बुधदृष्टे युग्मजनकः क्षिपितकः इति
केचित् गुरुदृष्टे नम्रः शुक्रदृष्टे वस्त्ररागकरः शनिदृष्टेऽङ्गहीनः रविदृष्टे दरिद्रः कुजदृष्टे राजा
रातीति धनुःस्थे चन्द्रे बुधदृष्टे जातिर्भर्त्ता गुरुदृष्टे नृपः शुक्रदृष्टे जनानामाधारः पापैर्दृष्टे दां
भिकः परकार्यप्रविमुखश्च मकरस्थे चन्द्रे बुधदृष्टे महाराजः गुरुदृष्टे राजा शुक्रदृष्टे विद्वान् श
निदृष्टे वित्तवान् रविदृष्टे दरिद्रः कुजदृष्टे राजा कुंभगे चन्द्रे बुधदृष्टे नृपः गुरुदृष्टे नृपतुल्यः शु
क्रशनिरविकुजान्यतमदृष्टे परस्त्रीशाकः मीनगे चन्द्रे बुधदृष्टे परिहासशीलः गुरुदृष्टे राजा
शुक्रदृष्टे पण्डितः पापैर्दृष्टे पापकर्ता लग्नदृष्टिफलं चंद्रदृष्टिफला निर्दिष्टो नोक्ते त्रिविधिरकरस
मागमे होराणां तद्दशाफलं भवति लग्नजातं इति अपर चंद्रदृष्टे लग्ने फलं किमितो के उ
क्रमेव होरास्वामी गुरुस्तत्रो स्थितप ताना न्ये सुविचार्य्यान्कटेति ततः कर्कलग्नवर्ज्जं अन्यलग्नं एका

चंद्रदृष्टिहीनबलत्वाद्शुभफलं तदुक्तं मुक्त्वा चन्द्रभवनं लग्नगतं शिशिरकिरणसंदृष्टमशुभ
मफलं निर्दिष्टं सकलेषु प्रसूतिसमयेषु ३ अथ होराद्रेष्काणद्वादशांशस्थितस्य चंद्रस्य
ग्रहदृष्टिफलं शार्दूलविक्रीडितेनाह होरेति होराराश्यर्द्धं होरायाः ईशः होरेशः तस्य समक्ष
द्दलं तत्राश्रितैः चंद्रहोरायां स्थितैर्ग्रहैस्तत्कृतस्य होरास्य ग्रहो दृष्टः शुभकरो भवति यत्र त
त्र राशौ रविहोरास्थग्रहैश्चन्द्रो यत्र तत्र राशिगैश्चन्द्रहोरास्थितैर्ग्रहैर्दृष्टः शुभकर इत्यर्थः अर्था
द्यार्कहोरास्थैर्दृष्टोऽशुभकर इत्यर्थः अंश इति यत्र तत्र राशौ यस्मिन् द्रेष्काणे चन्द्रः स्थितस्त
द्रेष्काणेशमित्रैर्दृष्टश्चन्द्रः शुभकरः यद्यपि सामान्येनोक्तं तथापि शुभग्रहैर्द्रेष्काणपतिमित्रैर्दृ
ष्टः शस्यते पापग्रहैर्मध्यमः तस्मादनेन स्वल्पजातकेऽउक्तं क्षेत्राधिपसदृष्टे शशिनि नृप
स्तत्सुहृद्भिर्धनवान् द्रेष्काणेनाशकैर्वा पापः सौम्यः शुभं नान्यैरिति बृहद्भिति मि
त्रहोत्रस्थैर्ग्रहैर्दृष्टचंद्रः शुभः अर्थात्स्वभवनगोऽप्यथवा अधारिभवनगो तैर्दृष्टोऽशुभः एवं
लग्नेपि योज्यम् यस्त्रोक्तमिति सति राशिमेषादिस्थे चन्द्रे ग्रहदृष्टे यत्फलमुक्तं चन्द्रफलमप्य

बुधाद्यैस्त्वा दिनात देवमेषादिद्वादशांशगे चंद्रे फलं वाच्यं एवं लग्नेपि तत्र कर्कद्वादशांशेंशी
ना च चन्द्रदृष्टिरशोभना सूर्याद्यै रिति मेषादिद्वादशांशगे चन्द्रे सूर्याद्यदृष्टे फलं तद्वतः परं व
क्ष्यमाणं ज्ञेयम् ४ मेषादिचतुःकनवांशगे चंद्रेऽर्कादिग्रहदृष्टे फलं वसन्ततिलकेनाह
आरक्षकः इति मेषाऽलिनवांशस्थे चन्द्रे रविदृष्टे नगररक्षोपि सुतः कुजेदृष्टे घातकः बुधदृ
ष्टे वा कुपुरुषप्रसिद्धः गुरुदृष्टे राजा भृगुदृष्टे धनुः शनिदृष्टे कलिकरो मूर्खश्च सर्पः वृषतुलांश
गे चन्द्रे रविदृष्टे मूर्खः कुजदृष्टे परदारशक्तः बुधदृष्टे कवित्वरतः गुरुदृष्टे भभकाव्यकर्ता भृगु
दृष्टे शराबासक्तः शनिदृष्टे परदारगामी मिथुनकन्याकर्कनवांशगे चन्द्रे सूर्यादिदृष्टे फलमा
ह वोधहीति कन्यामिथुननवांशस्थे चंद्रे रविदृष्टे मल्लादिकः कुजदृष्टे चोरः बुधदृष्टे मह
कवि गुरुदृष्टे मंत्री भृगुदृष्टे गीतवित् शनिदृष्टे शिल्पे कुशलः कर्कनवांशगे चन्द्रे सूर्यादिदृ
[illegible] कन्यामिथुननवांशस्थे [illegible] कृशदेहः कुजदृष्टे कृपणः बुधे दृष्टे ताप
सः गुरुदृष्टे प्रधानः भृगुदृष्टे स्त्रीमिर्वर्द्धनीयः शनिदृष्टे कार्यशकः ६ सिंहधनुमीननवांश

गेचन्द्रे सूर्य्यादिदृष्टे फलमाह प्रहर्षित एवाह सक्रोध इति सिंहनवांशगे चन्द्रे रविदृष्टे क्रोधी कुजदृष्टे
एतमान्यः बुधदृष्टे निधानभाग्यार्थः गुरुदृष्टे प्रतिहतारिः भृगुदृष्टे पुत्रहीनः शनिदृष्टे क्रूरक
र्म्मकर्त्ता धनमीननवांशगे चन्द्रे व्यातवीर्य्यः कुजदृष्टे हिंसामदेशकालज्ञः हृद्दचनाभिज्ञः
बुधदृष्टे उपहासकर्त्ता गुरुदृष्टे मंत्री भृगुदृष्टे कामहीनः शनिदृष्टे धार्म्मिकः ७ मकरकुंभांश
गे चन्द्रे रव्यादिदृष्टे फलं शालिन्याह अल्पापत्य इति मकरकुंभनवांशगे चन्द्रेर्कदृष्टे ऽल्पपुत्र
जः कुजदृष्टे धनेपि पमाऽपिडुः खीबुधदृष्टे गर्वी गुरुदृष्टे कुलानुरूपकर्म्मकृत् भृगुदृष्टे कुस्त्री
वल्लभः शनिदृष्टे रूपणाः एवं तत्कालनवांशवशात् ग्रहदृष्या लग्नेपि किंतु तत्र कर्कनवांशं
विना चन्द्रदृष्टिरप्रभा भानाविति रवौ चंद्रादिदृष्टे नदले चन्द्रवत् फलं अशुभफलं व्यत्ययेन सेपं
परमनवांशगचंद्रस्याशुभदृष्टिफलमिनीवनि स्वदृष्टे स्वनवांशकस्य मध्यमं किंतु पूर्णदृष्ट्य
दृष्टा चंद्रस्योक्तं तच्चन्द्रदृष्टा सूर्य्यस्य वाच्यं यथा मेषालिगेऽर्के चन्द्रदृष्टे आरक्षक इत्यादि ८
नवांशदृष्टिफलस्यैव विशेषं वसन्ततिलकेनाह वर्गोत्तमेति मेषादिनवांशगे चन्द्रे लग्ने च शुभ

बृ·जा·टी·
६७

सशुभं चेति द्विविधं दृष्टिफलमुक्तं आरक्षको वधरुचिरित्यादि तत्र वर्गोत्तमगतस्य यदुक्तं दृष्टि
फलं शुभमुक्तं तदतीव शुभं भवति स्वांशस्थस्य शुभं मध्यमं परनवांशगस्य शुभं स्तोकं एवं अशुभ
फलस्यापि मध्यलघुता अयमर्थः यत्र तत्र राशौ यत्र तत्र नवांशगे चन्द्रेऽर्कादिदृष्टे यत्फलं व
र्गोत्तमगतस्य स्तोकमिति एवं लग्नादित्यपोऽपि दृष्टिफले योज्ये जातके सर्वाण्यपि फलानि प
ठ्यन्ते अन्योन्यमपरं शास्त्रसंप्रयोगे रन्योन्यसंदर्शनसंगमैश्च अन्योन्यसंयोगवियोगसंज्ञाभिरिन्दुः
समुद्राम्बुवस्त्रमेयःशक्तिवीर्येति यस्मिन्नवांशे चन्द्रो लग्नं वा तन्नवांशेशो बली द्रेष्काणाधिप
ति फलं वा ददाति होरा द्रेष्काणनवांशभागे तत्र फलमपि ह्रस्वं हि अयमर्थः नवांशपतिर्बलो
न शीक्षणफलं हित्वा स्वेशेक्षणफलमेव ददाति अथ यांशपतिर्दुर्बलस्तदा राशीश्वराणां शेक्ष
णफले उभे अपि वाच्ये एवं लग्नचन्द्रयोरपि द्वयोरपि नवांशफलमेव वाच्यं यत्र तस्य श
शीक्षणफलं नोक्तं २ इति महीधरकृते बृहज्जातके दृष्टिफलाध्यायः १७ अथ भावाध्यायः
तत्र लग्नस्थिता पदैः फलमंशकान्तं पाह भर इति संज्ञा मध्यगः चरकार्यकृत् हीनदृष्टिः निर्द

ए·म·
६७

यः ईदृशो लग्नगेऽर्के सामान्यं मेषलग्ने तु धनी नेत्ररोगी सिंहलग्नेऽर्के रात्र्यंधः तुलालग्नगेऽर्के
नेत्रहीनः दरिद्रः कर्कलग्नगेऽर्के पुष्पितनेत्रः द्वितीयेऽर्के बहुधनः राज्ञाहृतधनः मुखपीडितः
१ तृतीयादिफलमौपच्छंदसिकेनाह मतिविक्रमेति तृतीये बुद्धिमान् पराक्रमी च चतुर्थे दुः
खी विप्रोद्विग्नः पंचमे पुत्रहीनो दरिद्रश्च षष्ठेऽर्के बली रिपुभिर्जितः २ सप्तमादिफलं
वसन्ततिलकेनाह स्त्रीभिरिति सप्तमेऽर्के नारीभिः परिभूतः अष्टमेऽर्केऽल्पापत्यः हीनदृ
ष्टिः नवमे पुत्री धनी सुखी दशमे विद्यावान् पराक्रमी च सुखेशोर्व्वीतिपाठः एकादशे बहुध
नी द्वादशेऽर्के स्वधर्मभ्रष्टः ३ इति रविविचारः लग्नादिगतचन्द्रफलं शार्दूलविक्रीडितेनाह
मूकेति लग्नेन्दौ वाग्विहीनः धातुवैषम्यात् यथेष्टाकारी अप्रतिपन्नः नेत्रहीनः अनुचि
तकर्ता श्रोत्रहीनः दासश्च कर्कमेषवृषलग्नेषु तु विद्वान् भूरिपुत्रः धनी च क्रमेण द्विती
येन्दौ बहुकुटुंबः तृतीये वधकर्त्ता चतुर्थे सुखी पंचमे पुत्री षष्ठे नैकशत्रुः सुकुमारः ना
ति प्रदीप्ताग्निः नातिकामी क्रूरस्वभावः ईप्सुरिति सप्तमेन्दौ पारर्द्धिमत्सरः अतिकामी अष्ट

[illegible] ६८

मेचतुरस्तः रोगपीडार्त्तः नवमेजनवल्लभः पुत्रीसुहृद्युतः बोधवान्विता धनी दशमे सर्वकर्मसमर्थः
धर्मवान् धनी एकादशे जनप्रसिद्धलाभयुतः द्वादशे हिंसस्वभावः अवयवरहितः ५ इतिचंद्रचा
रः लग्नादिगे कुजे वधे च फलं वसेत तिस्रके नाह लग्ने इति लग्ने कुजे ग्रहणादिनाक्षताङ्गः द्विती
ये कुत्सितान्नाशी नवमे पापी अन्यत्र कुजरवितुल्यफलदः इति कुजाचारः लग्ने बुधे पण्डितः
द्वितीये धनवान् तृतीये दुर्जनः चतुर्थे विद्वान् पंचमे [illegible] मंत्री षष्ठे रिपुहीनः सप्तमे ध
र्मवित् अष्टमे विख्यातयशाः नवमे द्विष्टरविवते इति बुधाचारः गुरुफलमिन्दुवत्सया
ह विद्वानिति लग्ने गुरौ पण्डितः द्वितीये शोभनवक्ता तृतीये अशाता चतुर्थे सुखी पंचमे बु
द्धिमान् षष्ठे रिपुहीनः सप्तमे जनकात् गुणाधिकः अष्टमे कुलानुचितकर्ता नवमे ताप
सः दशमे धनी एकादशे लाभवान् द्वादशे दुर्जनः ७ इति गुरुचारः भृगुफलं तामरसेना
ह स्मरेति लग्ने भृगौ कामाकुलः सुखी सप्तमे भृगौ कलिवल्लभः निपुणोऽभिलाषी पंच
मे भृगौ संज्ञातपुत्रः अन्यभावगृहवद्बहुफलं अन्त्ये मीनगे भृगौ यत्रतत्रस्थे धनी ८ इ

[illegible] ६८

तिभुक्त्याह॥ लग्नादिगेशानिफलं शिशिरिएयाह अहर्षार्थ ३ इति लग्नेशशनौ निस्वः रिदुःखाधि
तः कामाधीनः निष्ठमलोपेतः बाल्ये रोगी अतिमंदवाणीकः परंतु धनुमीनमकरतुलान्ये न
म लग्नेगेशनौ राजतुल्यः ग्रामस्य नगरस्य वाधिपतिः पण्डितः सुंदरदेहः अन्यत्र द्वितीयादि
भावेषु रविनुल्यफलदः नरकं स्वोच्चे स्वकीयभवने द्वितिपालतुल्यो लग्ने केंजे भवति दैयप
राधिनाथः शेषेषु दुःखगदपीडनएव बाल्ये हारिद्र्यकाम वशगो मदनो नोलसश्च ९ इति शनि
चारः लग्नादारभ्यतन्वादयो भावा सप्तग्रहाणां फलं विशेषं मालिन्याह गुहहिति॥
लाने मेवदेहं भादि येषां ते व्यते भावाश्च कुटुंब सहोत्थादयः तैः रूत्वा गुहहादिते त्रस्था
नां ग्रहाणां फलं विचार्यं गुहहदि ग्रहाणां मूलत्रिकोण नीचा पल सणार्थ परकीयउदा
सीनः अयमर्थः मित्रक्षेत्रे स्वोच्चे मूलत्रिकोणे वा स्थितो ग्रहो यद्भव स्थितः तस्य वृद्धिं
करोति शत्रुक्षेत्रस्थो नीचस्थो वा यत्र तत्र वा स्थितः तस्य हानिकरः उदासीनक्षेत्रस्थो न
वृद्धिं न हानिं तथा च गार्गिः नीचस्थो निपुगेहस्थो ग्रहो भाव विनाशकृत उदासीनगृहे

मध्यो मित्रस्वत्रिकोणगः स्वोच्चगश्च ग्रहो वश्यं भाववृद्धिकरः स्मृत इति सत्याचार्यस्तु सौम्यपा
पेक्षणयुगपच्चयविपत्त्यो वृद्धिनाशौ रूक्षमाम्नायानां वदंति द्वादशे षष्ठाष्टमेषु विपर्ययेवदन्ति अय
मर्थः यभ्रावे सौम्यास्तत्र भाववृद्धिः यत्र पापास्तत्र भावहानिः द्वादशाः सौम्याः अपहानिं कुर्वंति
पापाव्ययवृद्धिं कुर्वंतीति षष्ठाः सौम्या रिपुहानिं पापा रिपुवृद्धिं अष्टमाः सौम्या मृत्युहानिं पापाम
त्युवृद्धिमिति १० कुंडलीफलविशेषमनुष्टुभाह उच्चेति शुभफलपुच्छादिगेः सैषूर्णां दिके
भवति अयमर्थः ग्रहकुंडलीफलं शुभमशुभमिति द्विविधमस्ति तत्र शुभफलं स्वोच्चगः पू
र्णं ददाति मूलत्रिकोणगः पादोनं स्वक्षेत्रगोर्द्धं मित्रक्षेत्रगः पा[illegible] मात्रैः शत्रुक्षेत्रगः पादा
र्द्धं नीचगोस्तमितश्च न किंचित् अशुभं तु क्रमेणास्तमितो नीचश्चाशुभं फलं पूर्णं ददा
ति शत्रुक्षेत्रस्थः पादोनं मित्रगोर्द्धं स्वक्षेत्रगः पादं मूलत्रिकोणगः पादार्द्धं उच्चगो न किं
चिदशुभं एवं जातकाले ग्रहवशाज्जातफलं वाच्यं दशाष्टकवर्गादिफलं तु पंक्तिकाले शुभ
मशुभं वा तद्वफलानामेव भवति तथा च वंकालाचार्यः तत्कालेपत्रस्मको जइहोदशाप एम

रतस्य फलमशुभजरविसुहृद्वक्षयरोग्यमेव परिपूर्णं भयमर्थः तत्काले बलयुक्तो यदि भव
ति दशापतिस्तस्य फलमशुभं यदि वाशुभं वक्तव्यं नित्यमेव परिपूर्णमिति इति महीधरकृ
ते जातकविवरणे भावाध्यायः षोडशः १६ अथाश्रयाध्यायः तत्रादौ वेकादिसंख्योत्तरक्ष
ष्वावग्रहगतानां मित्रादिगृहगतानां च ग्रहाणां फलं पृच्छितानाम्याह कुलसमेति स्वभेक
ष्वान्कुलसमादयः यथा यत्र कुत्राप्येकस्मिन्स्वं शत्रुस्थः द्वयोः स्वेगयोः कुलाधिकः त्रि
षु बंधूनाम्मान्यः चतुर्षु धनी पंचसु सुखी षट्सु भूपइव भूपो न भूपतुल्य इत्यर्थः सप्तसु राजा
एवमेकस्मिन्मित्रक्षेत्रगते परविभवैः पोष्यः परजीवीत्यर्थः द्वयोर्मित्रपोष्यः त्रिषु स्वैर्ज्ञा
तिभिः पोष्यः चतुर्षु भ्रातृपोष्यः पंचसु गणस्वामी षट्सु बलस्वामी सप्तसु राजा १ एकोच्च
फलं रिपुक्षेत्रगानां च फलं मालिन्याह जनयतीति एकद्व्युच्चगता मित्रावलोकिताः सनरा
जानं करोति स एवोच्चमित्रयोगात्तन्मित्रयुतः सन् बहुधनं सिद्धिं सर्वात्राचाह पूजनं च कु
हते विवस्विति एकस्मिन्शत्रुक्षेत्रगे नीचगे वा दरिद्रः द्वयोः दुःखी त्रिषु विचित्त पंचसु पीड

ता·ज्या·टी
८०

न्तः षट्सु वधसमेतो वध्यरस्सर्पैः सप्तसु शत्रुगेषु नीचेषु वाऽजुरितसमेतः पापां पयपिसदृ मीचे
न भवंति तथापि वज्जवत् सर्वशास्त्रानुसारेणोक्ताः २ कुम्भलग्नफलमुपजात्याह नकुंभे
ति सत्याचार्यः कुंभलग्नं शुभं न वक्ति तदुक्तं कुंभविलग्नं जातो भवति नरो दुःखसंतप्त इति य
वनास्तु भागभेदाद्द्वादशांशभेदात्वं भग्नं न शुभमिति वदन्ति यस्य तस्य लग्नस्य कुंभद्वादशांशो
क्तो न शुभः कुंभलग्नं तु शुभमेव तदुक्तं सर्वास्मिन् लग्नपतौ कुंभद्विसांशो यदि समायाति एशो
तद्धानसुखिनः परान्नभोजी भवेन्मनुज इति विस्मृगृहस्तु कुंभद्वादशांशांशको ऽभवत्संग इति
वदंति यतः कस्य राशेस्तथा शभेदः कुंभद्वादशभागो नास्ति तस्माद्यदि कुंभद्वादशांशो
लग्नगो न शुभ इति कथ्यते तदा सर्वेषामिलग्नानां फलानि निरर्थकानि स्युः ततः कुंभलग्न
मेवाशुभं तदुक्तं कुंभद्वादशभागो लग्नगतो न तस्य नैव पवनैः यदेवं सर्वेषां लग्नगतानामा
नि च फलं ता स्यात् घटयोगाद्राशीनां नतन्मतं सर्वशास्त्रकाराणां तस्मात्कुंभविलग्नं
जन्मन्यशुभमनन्तम्ययो भागे इति ३ होरास्वगृहफलं वसंततिलकेनाह जातेषु स्विति ॥

राम
८०

विषमराशिस्थेषु रविहोरास्थेषु च पापेषु मेषादिविषमराशि पूर्वार्द्धेष्वित्यर्थः तदा जातो
नरो महत्सु कार्येषु यत्नी धैर्यवान् धनवान् अतितेजस्वी भवति सौम्येषु समराशि पू
र्वार्द्धेषु तेषु सौम्यस्वभाव द्युतिमान् सुखी जनवल्लभः बुद्धिमान् प्रियंवद ७ पुनर्होरा
फलमिन्दुवज्रयाह तास्विति पूर्वोक्तहोरास्वन्यराश्याश्रितेषु ग्रहेषु जाताः पूर्वोक्तमध्य
मगुणाः भवंति विपरीत होरासु विपरीतराशिगे ग्रहेषु जाताः पूर्वोक्तगुणरहितः अयम
र्थः पापा विषमराशि चंद्रहोराः गताः सौम्याः समराशौ रविहोरा गताः तदा पूर्वोक्त कि
चित् गुणवान् यदा च समराशौ चंद्रहोरायां पापाः विषमराशौ रविहोरायां सौम्याः तदा
पूर्वोक्तगुण वर्जितः स्यात् एवं ग्रहवशेन फलाधिक्यं वाच्यम् ५ चंद्रद्रेष्काणफलं वसंत
तिलकेनाह कल्याणेति स्वद्रेष्काणे तात्कालिकाधिमित्रद्रेष्काणे वा स्थिते चन्द्रे प्रशस्त
रूपः प्रशस्तगुणश्च अन्यद्रेष्काणगश्चन्द्र तद्द्रेष्काणेश समगुणं कुरुते यथा चंद्रेष्काण
चंद्रस्तदीशो चन्द्र मध्यस्थे मध्यमरूपो मध्यमगुणश्च चन्द्रद्रेष्काणगेशे चंद्ररिपौ जातरू

पगणहीनः व्यालेति सर्प्पद्रेष्काणस्थे चन्द्रे अमर्षा साधुद्रेष्काणस्थे प्राणिघातरतः चतुष्प
दद्रेष्काणगे गुरुदारगामी पक्षिद्रेष्काणगे चन्द्रे ऽटनशीलः सौम्यद्रेष्काणगे व्यालादिद्रेष्का
णगे च चन्द्रे फलद्वयमपि न वक्तव्यं वृश्चिकद्वितीयाद्य कर्कद्वितीयतृतीयौ मीनतृतीयः
एते व्यालद्रेष्काणाः मेषाद्यतृतीयौ मिथुनद्वितीयतृतीयौ सिंहद्वितीयतृतीयौ कन्याद्विती
यः तुलातृतीयः धन्विप्रथमतृतीयौ मकरतृतीयः एते सायुधद्रेष्काणाः मेषद्वितीयः
वृषद्वितीयतृतीयौ कर्कसिंहयोः प्रथमौ सिंहद्वितीयः तुलातृतीयः वृश्चिकतृतीयः सिं
हतृतीयः धन्विप्रथमः मकरप्रथमः एते चतुष्पदद्रेष्काणाः अत्रापि गुणद्वयांतर्भूत
द्रेष्काणस्थे चन्द्रे फलद्वयं वाच्य लग्नस्य द्वादशांशनवांशयोगफलं शालिन्याह
लेनरः इति मेषवर्ज्यं अन्यराशौ लग्नगते मेषांशे जातश्चौरः एवमग्रेपि वृषांशे भोग्यशीलः
मिथुनांशे प्राज्ञः कर्कांशे वित्तवान् सिंहांशे राजा कन्यांशे नपुंसकः तुलांशे प्रहृष्टिपः वृ
श्चिकांशे परहिंसाकरः धनुरंशे नीचवृत्तिः मकरांशे पापी कुंभांशे धानुष्कः मीनांशे निर्भयः

अधीरितिपाठे निर्बुद्धिः वर्गोत्तमनवांशेषु तुल्य एषां स्तेनादीनां स्वामिनः मेषलग्ने मेषांशे
चौरगणस्वामी वृषलग्ने वृषांशे भोगवर्द्दशः एवलग्नेपि द्वादशांशे राशिवत्फलानि मेषा
दिस्थे चंद्रे पानिफलान्युक्तानि उक्तातानि इगित्यादीनि तान्येव मेषादिद्वादशांशे जात
स्यवाच्यानि भौमांशे ७ जायान्वित इति स्त्रीयुतः धीर्पालंकायो हार्यायुतः तेजस्वी असम
मीक्षितकारी ईदृशः स्वत्रिंशांशस्थे कुजे भृगुफले त्रिंशांशोपादानात् अत्र भागशब्देन
त्रिंशस्थः एवमग्रेपि विधन्यभार्यः क्रूरत्वभावः द्वितीयस्त्रीकः दुःखयुतः गृहपश्वादिप
रिवारोपेतः मलान्वितः ईदृशः शनैः स्वत्रिंशांशगे जातो भवति ८ गुरुबुधयोः स्वत्रिंशां
शगयोः फलमाह स्वांश इति धनीयशस्वीसुखमानद्युतिमान्मान्यस्य छद्रेहः उत्पन
शीलः भोगी ईदृशो गुरौ स्वत्रिंशांशगे धीमान्गीतवाद्यादिकुशलः दंभीकवित्वकृतवा
वहूकः नीचकर्मा शास्त्रार्थेनार्नभसमीक्षितकारी अक्षिपूज्यः ईदृग्बुधे स्वत्रिंशांशगे
९ स्वत्रिंशांशभफलं भौमादित्रिंशांशयोम्भरवीदोः फलमंहाक्रांतयाह स्वत्रिंशांश इति

भूरिपुत्रः भूरिसुखः नीरोगः भाग्यवान् धनी रूपवान् भार्याऽति पाठे पत्नीवान् क्रूरः सुंदरा
ङ्गः अजितेन्द्रियो विषयासक्तः इत्यर्थः ॥ १६ ॥ शुक्रे स्वत्रिंशांशे भूरेति आरपूर्वांशके
षु कुजादित्रिंशांशेषु ज्ञाणदयास्त्रिंशांशोक्ता ग्राह्याः तेन कुजशनिगुरुबुधत्रिंशांशेषु रा
शिशशिपते शुक्रमातृस्नादयः स्युः अयमर्थः कुजांशस्थेऽर्के भूरः चंद्रे धीरकार्यकारी श
नित्रिंशांशगे वा क्रूरस्वभावः चंद्रे वयकृत गुरुत्रिंशांशगेऽर्के सकुणवृत्तः चंद्रे भनाद्यः
बुधत्रिंशांशगेऽर्के सुखी चन्द्रे पाण्डितः शुक्रत्रिंशांशगेऽर्के सुंदरनेत्रः चन्द्रे सर्वजनप्रि
य इति ॥ १० ॥ इति श्रीमहीधरकृते वृहज्जातकविवरणे आश्रयाऽध्यायः एकोनविंशः ॥ १९ ॥ अ
थ प्रकीर्णाध्यायः तत्र ग्रहाणां कारकसंज्ञा वैतालीयेनाह स्वर्क्षतुङ्गेति स्वक्षेत्रस्य मूल
त्रिकोणे च स्थितो ग्रहो यदि लग्नकेन्द्रगो भवति। तस्यान्यो ग्रहः स्वक्षेत्रादिस्थ एव केन्द्र
गः तदा तौ परस्परं कारकाख्यो भवतः एवं यावन्तो यत्संख्यास्तेऽन्योऽन्यं सर्वे एव कार
काः ख्याः कर्मग इति अनेन विधिना यो यस्मा दशमगः स विशेषेण कारकसंज्ञः १ अ ॥ त्म

न्योदाहरणं रथोद्धतयाह कर्कीति कर्कलग्नगश्चन्द्रः मकरे कुजः तुलायां शनिः मेषेऽर्कः कर्कि
एव गुरुः एवं योगे सर्व एव अन्योऽन्यं कारकाः अनेनोदाहरणेन एतदुक्तम् यथा नरस्य ज
न्मलग्नात् केन्द्रं विना यद्यपि स्वक्षेत्रस्वोच्चस्वमूलत्रिकोणगाः सन्तः परस्परं कंटकगाः
तथापि कारकत्वं न लभते लग्नगस्येति लग्नस्थस्य ग्रहस्य दशमश्चतुर्थश्च सर्वोपि ग्रह
कारकसंज्ञो भवति अनेनैतदुक्तं लग्नगो ग्रहो यदि स्वक्षेत्रादिस्थो न तस्माद्दशमश्चतु
र्थोपि यदि स्वक्षेत्रादिषु न स्यात् तथापि लग्नगस्य दशमश्चतुर्थो वा कारकाख्यो भवत्येवे
ति यतउक्तं लग्नेस्य सकलोऽयं योग इति २ अन्यत्कारकलक्षणमनुष्टुभाह स्वत्रिकोणेति
लग्नकेन्द्रं विनापि स्वक्षेत्रस्वमूलत्रिकोणान्यतमस्थो ग्रहो हेतुकारकः स्यात् यदि तस्यान्यो ग
हो मित्रभूतः सद्गुणसंपन्नः उच्चादिस्थः सन् दशमो भवति किंच सोपि दशमो पीदृशः का
रको भवति ।इहन्मित्रस्वाधिकं तद्गुणसंपन्नात्स्यात् कालिकमित्रं अधिमित्र इति केचित्
३ कारकसंज्ञाप्रयोजनमाह शुभमिति लग्नेस्वांशस्थे १ सूर्याद्द्वितीयभवने सौम्यग्रहयुते

नरपतेः केन्द्रेषु सद्ग्रहेषु चंद्रकारकसंज्ञेषु ग्रहेषु च ४ जन्मेशो भर्त्तुर्वाथ केन्द्रगाः सौम्यास्ति
ति प्रशस्ताः तदुक्तं एकस्मिन्नपि केन्द्रे पतिर्दशोम्यानग्रहोस्ति यात्रायां जन्मन्यथवा कर्मणि
न तच्छुभं गर्गाचार्यः इति यथा बहवस्तथाधिकं शुभं ४ यौवने छत्रयोगं दशापतिफल
पाकं वैतालीयेनाह मध्येचयः इति गुरुर्जन्मराशीशो जन्मलग्नगो वा केन्द्रगो यौवने सुखं दश
तां सर्वं वृद्धिकां तदुक्तं लग्नाधिपो लग्नपतिश्च तेषां चतुष्टये स्यात्फलवान् ग्रहश्चेत् चतुर्षु
होरादिषु संतेष्वेवं चतुर्थयः कालबलः ग्रहस्यात् प्रष्टेति दशेशाः पृष्ठोदयमादिगताः क्रमात् दशां
तमध्यादिषु फलप्रदाः स्व पर्यार्थः दशापतिर्दशाप्रवेशकाले पृष्ठोदयराशिगः स्वदशांते फल
प्रदः मीनराशिगो दशामध्ये शीर्षोदयगो दशादौ फलदः कर्कटोभ्यो नडुक्रम् आद्यंतमध्य
फलदाः शिरः पृष्ठोभयोदयाः दशाप्रवेशसमये निरवनुवान्यो दशापतिरिति ५ अष्टकवर्गफ
लं पुष्पिताग्रयाह पुनर्करेति चारवशात्पत्तिकाले भमभ्रुभं वाष्टकवर्गफलं रविकुजौ राशे
राद्यत्रिभागस्थौ प्रयच्छतः गुरौ शुक्रौ राशिमध्यत्रिभागगौ फलं ददः शनिचंद्रौ राश्यंते त्रिराम०

भागगो फलं दत्तः बुधोपायतराशोत्तिष्ठतितावच्छुभं वा फलं ददाति ६ इतिश्रीमहीधरकृते जातकविवरणे नष्टीर्णोऽध्यायविंशः ॥२०॥ अथानिष्टाध्यायः तत्र स्त्रीसुतनाशं शार्दूलविक्रीडितेनाह लग्नादिति लग्नात्सुश द्वापंचमे सप्तमं च मृभगहेः स्वस्वामिनापुत्रं दृष्टं वापुत्रं दभार्यापि दस्यात् तयोः शुभयोः स्वेशयोगदर्शनाभावे सुतकलत्रभावः किंच कन्यालग्नगे रवौ सप्तमे च शनौ स्त्रीनाशः कन्यालग्नगेर्के पंचमे च कुजे पुत्रनाशः सुतकलत्रपदमुपतसुकमन्येषां लग्नाच्चन्द्राद्वा तन्वादिभावानां स्वेशयुत दृष्टानां वृद्धिः तद्भावे हानिः १ भार्यामृत्तियोगत्रयं रुचिरयाह क्रूरेति क्रूरग्रहो भृक्रात् चतुर्थाष्टमगते रविशनिकुजे रत्निनास्त्रीनाशः एकस्मिन्नाशो वा पापद्वयमध्यगते भृग्के पतनाभार्यानाशः सौम्यानामन्यतमेन भृग्के गा विरहिते ऽनवलोकिते वा पापशाभार्यानाशः वंधनेनात्मानं स्त्रीव्यापादयंतीत्यर्थः तदुक्तम् चतुर्थाऽष्टमगैः भृकान्स्तोरा एकैः जेनाशनात् तेषांद्धितीयमध्यस्थे तपापभृके निपातजः भृके सद्योगदृक्हीने पापशाभार्यावधोभवेत् इति २ काणविक

लक्ष्मारयोगद्वयं वसंततिलकेनाह लग्नादिति यस्य द्वादशे चन्द्रः षष्ठोर्कसुतः स भार्यः काणो भ
वति यस्य भृगुर्कौ संयुतौ सप्तमे नवमे पंचमे वा स्तः तस्य भार्या हीनांगी तदुक्तं पंचमे नवमे
द्यूने सहितौ सितभास्करौ यस्य स्यात्ता भवेदार्या तस्य काङ्गविवर्जितेति २ वंध्यापतियोग
सुतकलत्राभावयोगं च रत्नमालयाह कोणोदयेति यस्य लग्ने शनिः कर्कालिमीनान्यत
मनवांशभनवांशगः भृगुः सप्तमः यदि पंचमस्थानं सौम्ययुतेन तस्य भार्या वंध्या स्यात् अ
यं योगो मकरवृषकन्यालग्ने एव संभवति वंध्यापतिग्रहणमेतज्ज्ञापयति यत्परिणी
ता वंध्या भवति द्वादशिकायां तु सुतोभवस्येव किंच पापग्रहेषु शनिभौमार्केषु यथासंभ
वं द्वादशलग्नमलग्नेषु स्थितेषु च चन्द्रे पंचमे भार्याहीनः पुत्रहीनश्च ४ परस्त्रीगमनादियो
गाहरिरप्याह असितेति यस्य शनिकुजान्यतमवर्गस्थः शनिकुजान्यतमदृष्टः सप्तमः
परदारगामी १ अस्मिन्नेव योगे यदि शनिकुजावेकराशिगौ संजातौ च अपमर्पः शनि
कुजान्यतमवर्गस्थः शनिकुजचन्द्रैरेकस्थितैर्दृष्टः भृगुः स्तितदा भार्यया सह व्यभिचारी

साचपरनरगामिनीत्यर्थः यत्रतत्रैकस्थाभ्यांभङ्गेन्दुभ्यांसप्तमोपरिशनिकुजौतदाभार्याहीनः
पुत्रहीनोवास्त्रीचनीचस्त्रीनरैतयोः स्त्रीनरयोरेकराशिगयोः सकाशात्सप्तमेयदि
शुभग्रहदृष्टोशनिकुजौस्तः तदाहंपतीपरिसातततनूवद्धौवद्धत्वेतस्यभार्यावद्धाभवतीत्य
र्थः ५ अन्यान्योगान्मनसाक्रान्तयाह वंशच्छेति श्रीशंकरंप्रणतभक्तभयापहंतंसकलर्द्धिदं
गिरिसुतापतिमीडईशं भस्मानुलिप्ततनुमाघमनोसितादंभुजगेन्द्रहारममलेंदुलसु
मौलिवंशेति यस्यचन्द्रोदशमःभङ्गः सप्तमः पापग्रहतुर्याः सवंशनाशकोऽर्थोघनप्राप
इत्यर्थः ७ धपतद्दुष्कारोकेन्द्रगेशनिदृष्टेशिलीअयमर्थः पञ्चाशेः संवंधिनिदुष्कारो
धेः स्थितः सराशिर्यदिकेन्द्रस्थनशनिनादृश्यतेतदाचित्रकार्याहिनाजीवतीत्यर्थः शा
निनवांशगेभङ्गेद्वादशेदासीपुत्रः शनिदृष्टोवहिरवीसप्तमोतदाऽनुचितकृत् ६
अन्यानिष्टयोगान्शार्दूलविक्रीडितेनाह पापलोकितमोइति पापदृष्टोभङ्गकुजौयस्य
सौतस्यवातव्याधिः वार्द्धकत्वगतिपाठेपक्षरोगाः यत्रतत्रराशौचंद्रशोवृश्चिकनवांशगाः क

वृ॰ ज्यो॰ टी॰
७५

कर्कनवांशगो वा पापयुतस्तदा गुह्यरुक्पुरुषव्याधिः शनिकुजौ द्वादशद्वितीयौ चंद्रो लग्ने रविः
सप्तमे तदा कुक्षी चंद्रो दशमः कुजः सप्तमः शनिः सूर्याद्दनगतः तदा हीनांगः ७ अन्यान्यो
गान्वसंततिलकेनाह अतरीति यत्रतत्रस्थे चन्द्रे शनिकुजमध्यगे तु रवौ तु मकरगे श्वासा
दिमान् ह्रुपोधानुर्ध्वयः प्लीहो वा मकुस्थितः मांसपिंडः विद्रधिर्व्रणो विशोषः गुल्मलक्षनुभु
हृन्नाभ्योतरे गंधिः संचारी यदि वाऽचलः उक्तश्चापा पृक्षपवानगुल्मइत्यभिधीयते इति रवी
न्द्वोरन्योऽन्यमहे से वागतयोः शेषवानत्वपी अयमर्थः कर्केऽर्कः सिंहे चंद्रः यद्वा यत्रतत्र राशौ
सिंहनवांशे चन्द्रः कर्कनवांशेऽर्कः तदा शोषितिनः तं परस्पर गृहे यातौ यदि वा पितर्हि गोम
वेतार्कर्म शीतांशुतदा शोषी प्रजापतः इति हि अइति तुल्यकालं तयो रेवान्योऽन्यक्षेत्रगयो र्वा
शोषी क्षशो वा अयमर्थः सिंहेऽर्केन्दु कर्कटे वा तदा पि ज्ञेयो पि दुर्बलो वा ८ अन्यानपि
योगान्वसन्ततिलकेनाह चन्द्रे इति धनुः पंचमनवांशगश्चंद्रो यदि शनिकुजयुक्तस्त
द्दृष्टो वा तदा पि कुक्षी वृश्चिककर्कवृषमकराणां मन्यतमः पापयुक्तो दृष्टो वा यदि पंचमो तम

नवमो वातहा पि कुक्षी पूर्वयोगोक्ते चन्द्रे शुभदृष्टे केन्द्रे वा न कुदृष्टं तदुक्तम् क्षीणे कुजशनयो
यथा कथंचिद्द्वादशमयस्थितिस्तोपद्वादशस्थाः यथा तथेति क्रमाभावः तदा नेत्रनाशः कथं बल
वतिचतुर्णां मध्ये यो बलवान् तस्यो वातपित्तश्लेष्मणां मध्ये यो दोषः उक्तस्तत्स्वकोपे
नदृष्टिनाशः १० अन्ययोगानाह नवमेति पापग्रहाल्लग्नात् नवमैकादशान्त्तोपपंचमीः
शुभैरदृष्टाः संतो बलवद्ग्रहदोषकारणेन व्याधिर्यकरः सप्तमस्थाः क्रूरः शुभैरदृष्टा
स्तथैव दंतविकारकरः अत्राशुभशब्देन पूर्वश्लोकोक्ताः स्वर्भानुर्कशनिकुजा एव ग्राह्याः
११ अन्ययोगो वैतालीयेनाह उदयतीति राहुग्रस्ते चन्द्रे लग्नगे कुजयोस्त्रिकोणगयोः पि
शाचाधिष्ठितः स्यात् एवं रवावन्धः १२ अथान्ययोगान् शार्दूलविक्रीडितेनाह सप्तमइति
सप्तमे शनौ लग्नगे गुरौ वा सप्तमः सप्तमे कुज लग्नगे गुरौ उन्मत्तो चित्तहस्पर्धः २ लग्नगे
ऽर्के जे कुजे नवमपंचमसप्तमान्यतमस्थे पि उन्मत्त एव ३ शनियुतक्षीणेन्दौ द्वादश
गे पि उन्मत्त एव १३ अन्ययोगान् वसंततिलकेनाह एरंपसेति यस्मिन्नंशे चन्द्रः स

राश्यंशस्तस्य यः पतिः सराश्यंशपः रविः चन्द्रः गुरुः एते स्वनीचराशिपतिनवांशे । पुनर्वा
शेवास्थितास्तदा दासो भवति ए भ्यर्तति ए कामल्पश्रवः झोमध्ये त्रयपञ्चत्वारो वा ग्रहाः उक्त
ग्रहेषु यस्यैको नीचाधिपनवांशगो द्विनवांशगो वास अभ्युपगमेनात्मजो जीवनार्थं नदा
सः यस्य द्वौ शत्रुपदासः अन्येन क्रीतः सन् दासः यस्य त्रयपञ्चत्वारो वै दशाः सगर्भदा
सः दासस्य दास्यां वा पुत्रो लोकगृहे जातः स्यात् १४ अन्ययोगानाह पिकृतेति व
यमेषधनुषामन्यतमे लग्ने पापदृष्टे पापवित्तरूपवन्तः १ मेषालिसिंहमकरकुंभधनुए
षामन्यतमे लग्ने पापदृष्टे खल्वाटः २ पापेक्षिते ऽर्के नवमे पंचमे वा मन्दनेत्रः शनौ पा
पदृष्टे नवमे पंचमे वकुरोगः कुजेश्च नवमे वा पापदृष्टे वा पापहीनांगः १५ अन्यानपि
वपोगान पुष्पिताग्रयाह व्ययसुतेति पापेषु द्वादशपंचमद्वितीयनवमेषु जातस्य बंधनं
वाच्यं तत्र भवने लग्नराशिर्येन विधिना वध्यते तेन रज्जुपाशेन बध्यते तथा मेषवृषधनु
रन्यतमे लग्ने जातस्य रज्जाहिनां वन्धनं मिथुनतुलाकुंभकन्यान्यतमे लग्ने निगडैः एम

कर्कसिंहमकरमीनलग्नेबंधनंविनादुर्मोक्षणांवृश्चिकलग्नेभुजगेहेभुजंगेति लग्नेद्रेष्का
णोभुजगभम् निगडपाशभद्रा निगडपाशभद्रिस्येकएवपाशभम् तः वधगपाठात् सचेद्बल
वतापापेनदृष्टस्तथापिभवनतुल्यबंधोवाच्यः भुजगद्रेष्काणाउक्ताः निगडभद्रेष्काणामकरए
घ १९ अन्यान्यवियोगान्हरिणपाह यत्रपेति शनियुतेचन्द्रेकुजदृष्टेतत्कालंपरिवेषयु
तेचजातोदुर्वचनः अपस्मारपीडितः क्षयः २ युतश्च अपमर्थः चंद्रेशनियुतेकृष्टिनवा
कृतादृशएवकुजदृष्टेऽयस्मात्तेश्च शनियुतेकुजदृष्टेचचन्द्रेसपरिवेषेदुर्योगयस्मा
रक्षयवान् यमरविकुजेरितिसौम्यग्रहादृष्टेषुरव्विशनिकुजेषुभ्रत्योभवति दुर्योद्दिष्टे
रव्याघेहत्तमाधममध्याभत्याः स्युः अपमर्थः त्रयाणामेकस्मिन्सौम्यादृष्टेदृशमेश्रेष्ठा
भत्तिंकरोतिद्वयोर्मध्यमां करोति १० इतिश्रीमहीधरकृतेजातकविवरणे निष्टाध्यायः
२१ अथस्त्रीजातकाध्यायः तत्रपुंजन्मोक्तंफलनिर्दिष्टं तदधिकंचवसन्ततिलकेनाह
यद्यत्फलमिति नरभवेपुंजन्मनियद्यत्फलं स्त्रीणांरत्तमं अयोग्यंतत्पतिषुयाच्यंवास्त्री

णां सर्वं फलं पतिषु वाच्यं वा योग्यं तता साम पिवाच्यं पुनर्लग्नादियोगफलमुभयो रपि एवं त्रि
विधानि फलानि कानिचित् स्त्रीयोग्यानि कानिचिन्नरेषु कानिचिदुभयो रपि यद्यपि स्त्रीफ
लं पतिष्वेव विशेषमाह तासामिति पतिमति रष्टमेवाच्या लग्नादिंदो श्च शरीरं सौभाग्यं
चेयाष्टरु पतिश्च पाहश्च लशुभयं सप्तमे वाच्यं तत्सर्वं वक्ष्यति यदुक्तं वपुर्लग्नेनुगंतरा
पुगमेष्विति समराशिगयोर्लग्नेन्द्वोः स्त्रीस्वभावा धारा तयो रेव सौम्यदृष्टयोः शोभनशी
ल लंकारयुता च लग्नेन्द्वोर्विषमराशिगयोः पुमाकारपुंस्वभावा च तयो रेव पापदृष्ट
योः पापकर्म गुणहीना च एवं लग्नेन्द्वो रन्यथात्वे मध्यमत्वं वाच्यं २ कुजराशौ ल
ग्ने कुजादित्रिंशांशजाता याः फलमिन्दुवज्रपाह कन्यैवेति मेषवृश्चिकान्यतमे लग्ने मेषादि
गे चन्द्रे वा सति तत्र कुजांशे दासी शुक्रत्रिंशांशे सति बुधत्रिंशांशगे मायया शाठ्येन युता
४ भक्त त्रिंशांशे दुर्वृत्ता ३ शुक्रबुधराशौ तन्नगे चंद्रगे वा कुजादित्रिंशांश फलमाह इष्टेति
वृषतुलान्यतमे लग्ने चन्द्रे वा कुजत्रिंशांशजाता दुष्टस्वभावा भानि त्रिंशांशे विवाहानंतरमन्यभा एम०

।२॥ गुरुत्रिंशांशे गुणवती बुधत्रिंशांशे कलज्ञा चतुरा भृगुत्रिंशांशे नपुंसकतुल्या गुरुत्रिंशां
शे गुणवती भृगुत्रिंशांशे कामातुरा ॥ कुला ४ चन्द्रार्क गृह शनि एषि गे लग्ने चंद्रे ३ च त्रिंशांश
फलं एवं [illegible] लविक्रोडिते नात्र सन्देहेति कर्कगे लग्ने चन्द्रे कुजांशे स्वैरिणी शन्यंशे भर्तृघ्नी
गुर्वंशे भूरिगुणवती बुधांशे शिल्पकर्मरता भृग्वंशे कुलटा सिंहगे लग्ने चंद्रे वा कुजांशे
पुरुषाकारा व्याचरितिपाठः ॥ नुचरिया चारित पस्याः शन्यंशे यां भला गुर्वंशे राजपत्नी बु
धांशे पुरुषस्वभावा भृग्वंशे गुरुगामिनी धनमीनगे लग्ने चन्द्रे वा कुजांशे बहुगुणवती
शन्यंशे स्वल्पकामा गुर्वंशे गुणवती बुधांशे कर्म्मण्या विज्ञानवती भृग्वंशे असाध्वी
मकरकुंभगे लग्ने चंद्रे वा कुजांशे दासी शन्यंशे ऽधमसंगरता गुर्वंशे साध्वी बुधांशे दुष्टा भृ

विषमराशौ त्रिंशांशचक्रम्				
मं	श	गु	बु	शु
५	५	८	७	५

ग्वत्रिंशांशे जातवंध्या भवति २ [illegible]
फलं ज्ञेयं तद्धेवा ॥ नुष्कमाह शशी लग्नेति २६
सर्वांकं फलं पंद्र लग्नात्प्रिते त्रिंशांशे योंधं

समराशौ त्रिंशांशचक्रम्				
शु	बु	गु	श	मं
५	७	८	५	५

भिन्नफलयोर्मन्दलग्नयोर्यवलीनत्फलं तेयम् योवलीहिनत्तत्फलं न स्यात् १ स्त्रीणां
स्त्रीभिर्मैथुनकारयोगद्वयं महर्षिरेणाह १ कुसंस्थाविति शनिभृगुजावाऽस्योऽन्यं पश्यं
तौ यद्यन्योऽन्यनवांशगतौ तदैको योगः वृषतुलान्यतमे लग्ने कुंभनवांशस्तदा द्विती
यः अस्मिन्योगद्वये नारीजघनोत्तवह्निचर्म्मयगिंगपाः अन्यनार्यया मैथुनं कारयति
७ अस्तमयेपतिरिति पद्यकं शार्दूलविक्रीडितेनाह अन्येऽति लग्नाद्यंशाद्यासप्तमो राशिः
सौम्योद्दष्टोवलहीनो ग्रहवर्जितश्च तत्र भर्ता कुत्सितः स्यात् १ लग्नेन्दोः सप्तमे शनि
उध्युतेन पुंसकः २ तयोः सप्तमे चरे प्रवासी अर्थात् स्थिरगृहेऽस्थिर एव द्विः स्वभावे क
दाचित्प्रवासी कदाचिद्गृहे स्थितः ३ तयोः सप्तमे रवौ पतित्यक्ता सा तत्सप्तमे कुजे अ
क्षतैव रण्डा शनावभ्रमदृष्टे तत्सप्तमे कन्यैव वृद्धा विवाहं नाप्नोतीत्यर्थः ८ अथान्ययोग
नाह आग्नेयैरिति एकस्मिन्समये फलमुक्तं आग्नेयैः क्रूरैर्वेऽभिः सप्तमे विधवैव क्रूरसौ
म्यैः सप्तमैः द्विः संस्थिता निर्वृत्ता सौम्यदृष्टे चक्रूरे सप्तमे भर्तृत्यक्तापत्नतज्ञ्योर्भकुजौ प

रस्परं नवांशगौ तदा परनरगामिनी चन्द्रशुक्रौ कुजभृग्वौ तदा पत्या जया व्यभिचारिणी ९ योगत्रयं
शालिन्याह स्तो रेति मकरकुंभमेषवृश्चिकान्यतमे लग्ने चन्द्रशुक्रयुते क्रूरदृष्टे च जननी सहिता
व्यभिचारिणी सप्तमे कुजनवांशे वा शनिदृष्टे स योगभगापदुक्तमभुभगतातदाह चार्विति स
प्तमे सौम्यनवांशे शोभनभगा पतिप्रिया च १० भतगुणान्सप्तमेशालिनीपुष्पिताग्राभ्यामाह
वृद्ध इति मकरकुंभान्यतमे तन्नवांशे वा सप्तमगे वृद्धो मूर्खश्च पतिर्भवति मेषवृश्चिकान्य
तमे लग्ने तन्नवांशे वा सप्तमे नारीप्रियः क्रोधी च वृषतुलाऽन्यतमे तन्नवांशे वा सप्तमे पतिः
गुणरोजनप्रियश्च मिथुनकन्याऽन्यतमे तन्नवांशे वा सप्तमगे पण्डितः सर्वत्र दृष्टिश्च पतिः ११
मदनेति कर्के तन्नवांशे वा सप्तमे कामी कोमलमितश्च पतिः धनुर्मीनान्यतमे तन्नवांशे
वा सप्तमे गुणी जितेन्द्रियश्च पतिः सिंहे तन्नवांशे वा सप्तमे कोमलतरो [illegible] व्यापारकर्ता च
पतिः एवं सप्तमराशेरंशस्य फलमुक्तं यद्वा राशिरंशो वाऽन्यतदा तयोर्बलवतः फलं वाच्यं
१२ योगविशेषान्वसन्ततिलकाभ्यामाह ईर्ष्यान्वितेति लग्ने चंद्रभृगू [illegible]

ख्यासक्ता च १ चन्द्रबुधयुते कुशला सुखवती च बुधगुरुयुते भुक्ते ण च युते लग्ने नानाविधिना बहु
सुखा बहुगुणा च १३ भर्तमरणे निधने इति तदुक्तं तत्राह क्रूरेति अष्टमे क्रूरे विधवा करत्वाह निधने
इति अष्टमाधीशो यस्मिन्नवांशे स्थितः एकं द्वौ नव विंशति त्रिंशत्यादिनां ग्रहसंबंधि वयसुक्तं त
तुल्ये वयसि विधवा स्यात् केचिद्वयः शब्देन दशा वदन्ति अष्टमेशदशायां विवाहो न तत्कालमिति स
र्वः अष्टमे सक्रूरेपि धने सौम्ये नार्यं वा दौ म्रियते किंच कन्यावृश्चिकवृषसिंहगे चन्द्रे स्तोकपु
त्रा १४ योगद्वयं शार्दूलविक्रीडितेनाह सौरेति शनौ नाति बलिनि चन्द्रभृगुज्ञबुधेषु बलिषु र
विकुजगुरुषु बलवत्सु विषमराशौ लग्ने जाता पुरुषवत्प्रगल्भा गुरुकुजभृगुज्ञबुधेषु समरा
शौ लग्ने कीर्तिमती शास्त्रज्ञानोद्यपरायणा च १५ प्रव्रज्यां ग्रहर्षिराण्याह पापेति सप्तमगृह
फलं तदुक्तं तद्विहाय नवमे ग्रहे सति नवमतुल्यां प्रव्रज्यां प्राप्नोति अत्राध्याये
ये योगा उक्तास्ते विवाहकाले कन्यामार्गणकाले वा ग्रहानकाले पृच्छाकाले वर्तमानाः उ
क्तफलदाः स्युः १६ इति महीधरकृते जातकविवरणे स्त्रीजातकाध्यायो द्वाविंशः ॥२२ अथा एम॰

ष्टमेशाग्रहे तद्धीने वा मृतिप्रकारं शार्दूलविक्रीडितेनाह मन्त्विति यस्याष्टमे ग्रहहीने बली ग्रहः
पश्यति तस्य योधातुः पित्तादिः तत्कोपान्मृतिः यथा रविकुजयोः पित्तं गुरोः कफः शनेर्वा
तः भक्षेन्दोर्वातकफौ बुधस्य त्रयः तदिति तेनाष्टमेन संयुक्तयद्गात्रं एवं पश्यं गं तज्जो मृत्युः
अयमर्थः अष्टमो राशिः कालांगे यत्रास्ति तद्रूजो शोकदोषः बुधे ज्वरेण कोणकोपान्मृति
रितिव हर्वा वह्निनोयघः अष्टमं पश्यति तद्दा तद्धातुकोपान्मृतिः अग्निति रवावष्टमे ग्निनाम
त्तिः चन्द्रे जलेन कुजेन शस्त्रेण गुरौ बलात् तत्तोगेण भक्षेत् नपाशानो क्षुधया एतेषु बली
घूको मत्तः शुभकर्मणा बलहीनेष्टमभेन मध्येषु मिश्रकर्मणा मरणप्रदेशमाह
निधन इति अष्टमे राशौ परदेशे मृत्तिः स्वदेशो स्थिरराशौ द्विस्वभावे पथिमृत्तिः १
अन्यान्मृतियोगान् शार्दूलविक्रीडितचतुष्टयेनाह शैलेति रवौ दशमे कुजे चतुर्थे गिरि
पातान्मृतिः चतुर्थे शनौ दशमे चन्द्रे कूपान्मृतिः चंद्रार्कौ क्रूरेक्षितौ यदि कन्याराशिगतौ त
दास्वजनान्मृतिः २ द्विस्वभावलग्नगे यदि चंद्रार्कौ तदा जले मृतिः ४ २ मन्द इति कर्कगेश

नीचेंदे मकरगे जलोदरव्याधिना मृतिः मेषवृश्चिकान्यतमगे चन्द्रे पापद्वयमध्यगे मृतिशस्त्रेणा
ऽग्निना वा मृतिः कन्यागते चन्द्रे पापद्वयमध्यगे चेद्रुधिरप्रकोपात् शोषाद्वा मृतिः मकरकुं
भगे चन्द्रे पापद्वयमध्यगे रज्वा वह्निना पतनेन वा मृतिः ३ बंधादिति सौम्यादृष्टो क्रूरै
वृद्दि पंचमनवमोनहा बंधनेन मृतिः अष्टमद्रेष्काणा पाशसर्पनिगडधृते बन्धनेन मृ
तिः कर्कद्वितीयान्त्यो वृश्चिकाद्यद्वितीयो एते सर्पपाशद्रेष्काणाः मकराद्यमीनान्त्यो
निगडद्रेष्काणो मीनलग्नगे मे सप्तमे कन्याष्ष्ठे चन्द्रे अष्टमधृते भृग्वौ मेषगते रवौ लग्न
गते स्वगृहे स्त्रीनिमित्तान्मृतिः ४ शूलेति कुजे सूर्ये वा चतुर्थे शनौ दशमे शूलारो
पितस्य मृतिः रविकुजशनिक्षीणचन्द्रेषु पष्ठा संभवं पंचमनवमलग्नेषु शूलादेव मृ
तिः चतुर्थेऽर्के क्षीणचन्द्रे दृष्टे कुजे दशमे च काष्ठशूलादेव मृतिः अस्मिन्नेव योगे रवौ
चतुर्थे दशमे कुजे शनिदृष्टे काष्ठेन मृतिः ५ अन्यान्मृतियोगानाह तत्तिलकाभ्यामा
ह रंध्रेति क्षीणेन्दुरष्टमः कुजो दशमः शनिर्लग्नगः रविश्चतुर्थः तदा वह्निप्रहरणान्मृतिः

क्षीणेन्दुर्दशमः कुजो नवमः शनिर्लग्ने रविः पंचमस्तदा धूम्राकुलतया वह्निना वा वधेनेन
वा शरीरस्य निकृन्तनं मुष्टिवज्रादिप्रहारैस्तेन वा मृतिः ६ वर्षिवेति कुजश्चतुर्थः रविः सप्तमः
शनिर्दशमः तदा वज्रादिना वह्निना वा न्यग्रोधेन वा मृतिः शनिर्द्वितीयः चन्द्रः चतुर्थः
कुजो दशमः तदा व्रणोत्पन्नैः कृमिभिर्मृतिः ७ अन्ययोगान् शार्दूलविक्रीडितेनाह स्वस्थ
इति रविर्दशमः कुजश्चतुर्थः तदा रथ्याश्ववादेर्वाहनात्पतनेन मृतिः कुजः सप्तमः क्षीण
चंद्रार्कशनयो लग्ने तदा तैलादियन्त्रपीडया मृतिः तुलायां कुजः मेषे शनिः मकरकुंभाम
तमे चन्द्रः तदा विष्टायां मृतिः ८ योगान्तरं वैतालीयेनाह वीर्यान्वितेति यत्र तत्रस्थ चन्द्रो
बलवती कुजेन दृष्टः शनिरष्टमः तदा गुह्योत्पन्नो रोगो यो भगंदरादिस्तत्पीडया कृमियु
तनेन वा शस्त्रकर्मणा वाग्निदाहेन वा मृतिर्भवन्ति ९ योगांतरं वसंततिलकेनाह अ
स्तेति रविकुजौ सप्तमौ शनिरष्टमः क्षीणेन्दुश्चतुर्थः तदा पक्षिकृता मृतिः अग्निसंस्कारभाव
इत्यर्थः लग्नेऽर्कः कुजः पंचमः शनिरष्टमः चंद्रो नवमः तदा पर्वतस्योत्पतनेन कूपपातेन

भिन्निपातेन वा मृतिः २० अथ यस्योक्तयोगानामभावः न चाष्टमं केनचिद्दृष्टं युतं वा तन्मृतिं वेला
लीयेनाह द्वाविंश इति लग्नद्रेष्काणात् द्वाविंशो द्रेष्काणो मृतिहेतुर्बुधैरुक्तः तदेवाह तस्येति तस्य
द्वाविंशद्रेष्काणस्य स्वामी यद्वा भपोऽष्टमाधीशो वा स्वगुणैः रन्ध्रं वा पुष्येत्यादिना कर्मतिं दद्यात् इति
अयमर्थः द्वाविंशो द्रेष्काणोऽष्टमराशौ भवति यदि लग्नस्यादिद्रेष्काणं तदाष्टमभयनस्यापि
प्रथमः लग्नस्य द्वितीयेऽष्टमस्यापि स एव लग्नस्य तृतीये ऽष्टमस्यापि स एव सर्वेषामप्येवमे
व व्यवस्था तेन यस्योक्तयोगानामभावोऽष्टमे च यः कोऽपि ग्रहदर्शनाभावस्तदा द्वाविंशद्रेष्काणा
धिपोऽष्टमेशो यो बली तत्कृतदोषेण मृतिः २१ मृतिभूमिज्ञानं वसन्ततिलकेनाह होरेति
लग्नस्य यो नवांशस्तद्धिपेन युक्तो यो राशिः लग्ननवांशेशो यस्मिन् राशौ स्थितः तत्तुल्यभूमौ मृ
तिर्वाच्या तद्यथा लग्ननवांशाधिपे [illegible] घटमिथुनस्थे गृहे मृतिः कर्ककन्यामक
करमीनान्यतमस्थे ऽनूपे स्थिते तस्थे रएप तुलास्थे इति भूमौ वृश्चिकस्थे गर्ते धनुस्थे त्व
प्रचारभूमौ मेषस्थे जाविप्रचारभूमौ वृषस्थे नवांशाधिपे गोप्रचारभूमौ मृतिरिति न

केवलेन नवांशाधिपाश्रितराशिवशेन भूर्वाच्या किंतु योगेक्षणादिभिरप्येतत्फलं अयमर्थः ल
ग्ननवांशाधिपो यद्राशौ स्थितस्तत्र चेदन्यग्रहस्य योगो दर्शनं वा तदा तद्ग्रहस्य भूमिर्वाग्नि
विहारेस्तादिनोक्ता वाच्या यद्ग्रहो योगेदर्शने वा वर्त्तिनो भूर्वाच्या मोह इति लग्नस्य यावंतो नुदि
तानवांशास्तेषां समपरिमितानां यावान्कालास्तावान्कालं स्मृतिसमये मोहो ज्ञातव्यो वाच्यः
लग्नेस्वपतिदृष्टे सएवकालो मोहेद्विगुणो वाच्यः सौम्यदृष्टे सफलास्त्रिगुणो वाच्यः एवं
स्वामिना सौम्यग्रहेण दृष्टे सकाल षड्गुणो मोहे वाच्यः १२ मृतशरीरपरिणाममाह लि
न्याह दहनेति अष्टमभवनगते हुतनजलविमिश्रेद्रेष्काणैः शवस्य भस्मसंक्लेदशोषाः
परिणामाः स्युः अयमर्थः लग्नाद्रेष्काणात् द्वाविंशो द्रेष्काणः तस्मिन्मृतदेहोऽग्निना द
ह्यते भस्मरूपः परिणामः अष्टमद्रेष्काणः यदि जलद्रेष्काण सौम्यद्रेष्काणः तदा संक्लेदः
मृतदेहो जले क्षिप्यते यदि सम्मिश्र द्रेष्काणस्तदा शोषणं दृष्ट्वा तेनाग्निना क्षिप्यते एव
मेव भव्यति सौम्यद्रेष्काणः पापयुक्तो मिश्रः पापद्रेष्काणो वा सौम्ययुक्तो मिश्रः बालेति

अष्टमस्थैर्व्यालवर्गैः सर्पद्रेष्काणैर्विदंतः विद्धांतः परिणामो यस्य सः स मृत आशु भुजगालादिभिर्भक्ष
त इत्यर्थः कर्कटद्वितीयो वृश्चिकाद्यद्वितीयो मीनान्त्यश्च व्यालद्रेष्काणाः तदुक्तं शशिग्रहद्
र्धापरगोकीटस्य च मीनपश्चिमो भागः निधने यस्य द्रेष्काणा न स्य च मृतस्य मांसानि भुंजन्ति
वायसाद्याः शालिसमूहानां चात्र संदेहः पापग्रहद्रेष्काणो यस्याऽष्टमराशिसंस्थितो भवति
दहनं प्राप्नोति नरो मृतमात्रोऽग्निम्भि तं प्रवदेत् एवं सौम्यद्रेष्काणे जलमध्ये क्षिप्यते नरो मृतः
सौम्यद्रेष्काणैः पापैः पापद्रेष्काणोपि सौम्यसंयुक्तः यस्याष्टमभवनगतः शोषं प्राप्नोति म
रणान्तमिति एवं शवस्य परिणामो यथोक्तो विज्ञेयः गत्यनूकादि पप विमिश्रैरूतप
हास्यमिदमेव तस्माद्विचार्यं मृतस्य का गतिर्भवति इति गतिः कस्माल्लोकाद्यमागतर
स्यः नूकं अतीतजन्म आदिशद्यात तत्रसौरोदशाग्यामीदित्यादि १२ तत्रानूकत्तानं मालिन्यार
गुरुरिति गुर्वादयो बुधादि लोकसानुजनानू आनूके प्राग्जन्मनि कुर्युः किंभूतगुर्वोद
यः दिनकरेति रविचंद्रयोर्यो बली तेनाश्रितो यस्त्र्यंशो द्रेष्काणस्तत्पनाथाः स्वामिनः संतइत्य एम

र्थः अयमर्थः सूर्येन्द्वोर्मध्ये बलिनाश्रितद्रेष्काणेशेन गुरौ देवलोकादागतः इति वाच्यं चंद्रभृग्वोर
न्यतरद्रेष्काणेपि तल्लोकादागतः रविकुजान्यतरद्रेष्काणेशे तिर्यग्लोकादागतः शनिबुधान्य
तमद्रेष्काणेशेन नरकादागत इति तत्रापि श्रेष्ठमध्यहीनत्वं ज्ञानमाह प्रवरेति तुंगह्रासात्।
उच्चस्थानचलनात् क्रमेण प्रवरसमनिकृष्टा उत्तममध्यमहीनान् ग्रहाः पूर्वोक्ताः स्युः अ
यमर्थः यस्य ग्रहस्य लोकादागतः स चेदुच्चस्थस्तदा लोके प्रधान आसीत् उच्चपतितो नीच
गस्तदा अधम आसीदिति ज्ञेयम् १४ मृतस्य गतिमालिन्याह गतिरिति रिपुरंध्रत्र्यंशपः
षष्ठाष्टमद्रेष्काणेशो गतिः गतिप्रदः पूर्वश्लोकोक्तां गतिं ददातीत्यर्थः अयमर्थः यस्य ज
न्मलग्नात् षष्ठाष्टमस्थानि भान्यानि तस्य तत्कालं षष्ठद्रेष्काणो पश्चाष्टमद्रेष्काण
स्तयोर्यावधीपतीतयोर्यो बलवान् तस्य लोकः पूर्वोक्तः स एव तस्य गतिरिति तेन मृतेन
तत्र गंतव्यमित्यर्थः अत्रेति वा शास्त्रार्थः सप्तमस्थत्र्यंशात् षष्ठाष्टमगा ग्रहो नि
जगतिप्रदो भवति यदि षष्ठसप्तमाष्टमानां मध्ये द्वेत्रीणि वा सग्रहाणि अपि केस्मिन्नपि

ष्ठाद्यो महांस्तत्र तेषां यो बलीन ल्लोके मृतस्य गतिर्वाच्या तदुक्तं गुरुपितृतिर्यग्नरकाना गुरु
रिंद्रसुता व सत्यमाहुरिशरंध्रम्रंगा कयाचातारितिविषनष्यात इति मोक्षगतिमाह गुरुरिति कर्कस्थो
गुरुः षष्ठस्थानगः केन्द्रगतः अष्टमो वा तदेको योगः मीनलग्नगते शुभग्रहे नवांशगो गुरुः
अन्ये बलहीनास्तत्र द्वितीयो योगः एतद्योगद्वये जातस्य मोक्षगतिः अयं योगो मृतकाले पि व
र्तमानो मोक्षदो नतूक्तम् षष्ठाऽष्टमकंटकगो गुरुरुच्चे वा वसाने लग्ने वेशो वेरवलैर्जन्म
नि मरणे मोक्षगतिमाहुरिति इति श्रीमहीधरकृते जातकविवरणे निर्याणाऽध्यायो द्वा
विंशः २२ अथ नष्टजातकाध्यायः तत्र प्रसूतिकालमिन्द्रवज्रयाह आधानेति यस्या
धानकालो न ज्ञातस्तेन तस्याधानकालादेव जन्मोक्तं तत्कालमिन्दुसहितेत्यादिना जन्मका
लो पि व्याख्यात एव आधानजन्मकालयोरज्ञाने प्रष्टुः प्रश्नलग्नात् जन्म प्रवदेत् पृच्छा
लग्नग्रहान्स्पष्टान् कृत्वा वक्ष्यमाणाविना सर्वं वाच्यमित्यर्थः
तत्रायनमाह पूर्वेति पृच्छालग्नस्य पूर्वापरार्द्धयोः सूर्यो ए म०

नरद्रक्षिणाः पनयोः जन्मप्रदेत्यपमर्थः लग्नाधहोरायां मकराशिषद्गतेर्कजन्मवाच्यं ल
ग्नत्रिकोणेति लग्नत्रिकोणेषु लग्नपंचमनवमेषु त्रिभागे लग्नद्रेष्काणे गृहकल्पयेत् अथम
र्थः प्रथमलग्नस्य प्रथमद्रेष्काणोदये लग्नात्पंचमराशिस्थे गृहजन्मवाच्यं यथपिसामान्येन
गर्भवस्थानमुक्तं तथापि द्वादशांशक्रमेण प्रतिराशौ गृहः संचारिणीयः यथाप्रथमलग्न
स्य प्रथमद्वादशांशोदये लग्नराशिगो गृहे जातः द्वितीयद्वादशांशोदये द्वितीयस्थे गृहे जातः
एवं तृतीयादि द्वादशभागोनतितायादिषु गृहगृहः विकल्पेति एवं गृहे रचस्थानं ज्ञात्वा तस्य
वयोनमानात्वर्षाणि कल्पयेदित्यपमर्थः तस्याकृतिमपेक्ष्य वयोनमानं कार्यं तत्र
द्वादशवर्षेषु राशिचक्रभ्रमणं भवति तत्र पुरुषलक्षणोक्तेन द्वादशदशा विभागेन द्वाद
शवार्षिकी दशा तेनेषु परिकल्प्य तद्धेत्वाङ्ग संस्पर्शात् वर्षज्ञानं तथोक्तं पुरुषलक्षणोपा
दो सगल्को प्रथमे प्रदिष्टं जङ्घे द्वितीयं तु सजानवक्रो मेढ्रोरुमुष्कं च ततस्तृतीयं नाभिक
टिश्चेति चतुर्थमाहुः उदरं कथयंति पंचमं हृदयं सषष्ठमाहुः स्तनान्वितं । अथ सप्तममपज

अणी कथयेहषमनोषद्कंधरेनवमंनवमेनचसुभ्रुणींसन्नलाटंदशमंशिरस्तथा अशुभेषशुभद
शफलंवदणाघेषुभेषुशोभनमिति २ एवंविंशात्यधिकेवर्षशतेनीतेवर्षत्रानोपायोनास्तिए
ववर्षत्राते आतुरावमाह गोष्ठ इति पूर्वाल लग्नगतेऽर्के द्रेष्काणेवा गोष्ठ आयेयः शेषेष्वंद्रा
घेस्त द्रेष्काणैर्वा लग्नगैः कथिताः आलवपूर्वमृत्यः इत्यर्थः ३ लंचद्रेः द्रेष्काणैः शिशिरद्यः
सकुचग्वादिषु घतसुवेतिन यथा लग्नगे सानो लद्रेष्काणे वा शिशिरः एवंभुक्रेय सन्तः
कुजेग्रीष्मचंद्रे वर्षाबुधे शारद गुरौ हेमन्तः वपुषुलग्नगेषु बलिनः आनेः लग्नगेमह
भावेद्रेष्काणेशान्मतुः अन्येति अन्यस्मिन्नयनेऽन्यस्मिन्नतो रविचारवशात् आनुर्वेयः
अपमर्थः एवंपराहुं भवनस्यविंशाश्वानाद्रु देदृष्किणगेयस्तिमु किंतिउक्तं तत्रोत्तरायणे
शातेपघाग्रहो लग्नतुवेतं भवति तदार्कं चारवशेन आनुर्वाच्यः मकरादिगेरवौ शिशिरादिया
च्याः इत्यर्थः अयनयापसपरिवर्तमानं आनुत्तानं चेन्दुवज्ञयाह चेदृत इति अयने
विलोमेविपरीतेसति लग्नऽरहवेशादृतानेयपवनेविपरीतंभवति तथाचन्द्रबुधगुरुस्तु

रुशनिभिः परिवर्त्या अत्ययेन व्याख्या चन्द्रभुक्तेन बुधकुजेन गुरुशनिना अयमर्थः यदि उत्त
रायणे वर्षा जातः तदा वसन्तो ज्ञेयः एवं चन्द्रभुक्तेन परिवर्तितः अथ दक्षिणायने वसं
ते तदा जन्म वर्षा ऋतौ यदि भुक्तं चंद्रेण परिवर्तितः अथोत्तरायणे शरत्तदा ग्रीष्मं दक्षिणायने
ग्रीष्मे तदा शरदिति बुधकुजाभ्यामन्यं परिवर्तितो उत्तरायणे हेमन्तः शिशिरो दक्षिणायने
शिशिरः प्राप्ते हेमन्त इति गुरुशनीपरिवर्तितो द्रेष्काणेति प्रथमलग्नद्रेष्काणे पूर्वभागे पूर्व
यातः पूर्वमासः द्रेष्काणोत्तरार्द्धे निरूपितो द्वितीयमासः इत्यर्कावस्थानेन मासज्ञानं तिथि
ज्ञानं चाह अनुपातादिति अनुपातात् गैराशिकात् तिथिर्विकल्प्या लग्नस्य षड्लिप्ताशता
नि द्रेष्काणः तेन अनुज्ञानं तत् इष्ट लिप्ताशतत्रयं तेन मासज्ञानं अनुपातात् तिथिं लि
प्ताहश्वकेनैका ज्ञेया एवं तिथिरादित्यभागः एवमर्कस्य राशयो भागाश्च ज्ञेयाः मासराश
यस्तिथयो भागाः ज्ञानं वर्षं प्रदर्शिताः सोर्कतिथौ जन्मेति ज्ञेयं [illegible] चंद्रमासेन तिथिज्ञा
नमाह अत्रापीति अत्रापि तिथिज्ञाने होराशास्त्रज्ञाने मुनयोर्कभागसमांतिथयो वदन्ति॥

प्रश्नकाले तात्कालिकेऽर्केण यावतोंशान्भुक्तास्तावंतः शुक्लप्रतिपदादितिथयो मृत्क्षा वाच्याः
अत्र चन्द्रमा सेज्ञेयः एवमन्येष्वपि मासकल्पनात् क्रमम् एष्यत्काले (रविणा) यावद्‌शाः स्फुट
संयुक्ताः एशे स्ता तिथयः स्युः शुक्लादारकमासस्येति एवं दिने ज्ञाते रात्रिदिवाजन्मज्ञा
नमाह एत्रीति एतिषु संज्ञा एशयः पूर्वमुक्तागोजाद्विदस्ताहिनारात्रिदिनसंज्ञेषु ल
ग्नेषु विपरीते जन्म ज्ञेयम् अयमर्थः मेषवृषमिथुनकर्कधनुर्मकराख्यतमे प्रश्नल
ग्ने दिने जन्म अन्येषु रात्राविति एवं दिनरात्रिज्ञाने वेलामाह भागो रिति लग्नभागैः क्रम
शः परिपाट्या वेला कल्प्या जन्मसमये ज्ञेयः अयमर्थः जन्मदिने विज्ञाते तस्माद्दिनरा
त्रिप्रमाणमानीय यदि दिवाजन्म तदा दिनप्रमाणेन रात्रिजन्म रात्रिप्रमाणे तत्काल
प्रश्नलग्नभुक्तपलनिस्त्रिगुण्य ततः स्वदेशोदयमानेन भागमपहृत्य या वा धं वेला
तावति काले दिनस्य रात्रेर्वा गते सा जन्म गच्छ ॥ मतान्तरेण मासमाह केचिदिति केचित
चंद्रभुक्तान्नवांशात् शुक्लान्त्यहे ज्ञमासं वदन्ति अयमर्थः प्रश्नकाले यस्मिन्नवांशे चंद्रस्तम

पिनवांशेन वधा कृत्वा यस्मिन्नवांशे नवमे चन्द्रस्तत्पुतंन नक्षत्रमन्यगतं न तत्र संवधि मिथु
नोनस ज्ञो मासि जन्मवाच्यं यथा कृत्तिकया युक्ता कार्तिकी पौर्णमासी तया युक्त कार्तिकः
एवं मार्गाद्येवस्युनक्षत्रयुक्तांतसंज्ञो मासो नास्ति तत्स्य युक्तो एकविधिनाभुज्ञानसंज्ञो मा
सकल्प्यः तच्चोक्तं नक्षत्रेण सहोदयमस्तं वा यंतियेन सुरमंत्रीन तत्संज्ञं वक्तव्यं वर्षमासक्र
मेणैव वर्षाणि कार्त्तिकादीनि भानियाद्वयं तु योगिनी क्रमशस्त्रिभं तु पंचममपास्यमं
स्याच्चपवर्षमिति तत्रचंद्रो वृषनवांशे तन्नवांशसदृक्स्यवीगरभव जितदा कार्तिकोज्ञे
यः वृषनवांशे तद्दृश सप्तकोर्ध्वं मिथुननवांशे तद्दृशाध द्वस्यार्वाक् तदा मार्गशीर्षः मिथुनन
वांशा षष्ठोर्ध्वं कर्कनवांशे पंचकार्वाक् पौषः कर्कनवांशे तन्नवांश पंचकोर्ध्वं सिंहनवांशे
तन्नवांशा चतुष्टयर्वाक् माघः सिंहे नवांशे तन्नवांश चतुःकोर्ध्वं कन्यानवांशे तन्नवांशत्र
सप्तकार्वाक् चंद्रे फाल्गुनः कन्यानवांश तन्नवांश सप्तकोर्ध्वं तुलानवांशे तन्नवांश षट्कार्वा
क् चंद्रे चैत्रः तुलानवांशे तन्नवांश षट्कोर्ध्वं वृश्चिकनवांशे तन्नवांश पंचकार्वाक् चंद्रे वैशाखः

वै. ज्यो. टि.
८५

र्श्चिकनवांशेतन्नवांशपंचकोर्ध्वं धनुर्नवांशे तन्नवांशचतुष्टपार्श्वांकचंद्रे ज्येष्ठः धनुर्नवांशेतदं
शचतुष्टयोर्ध्वं मकरनवांशेतन्नवांशत्रयपार्श्वांकचन्द्रे आषाढः मकरनवांशेतन्नवांशत्रयोर्ध्वं कुं
भनवांशद्वयपार्श्वांकचंद्रे श्रावणः कुंभनवांशेतद्दशद्वयोर्ध्वं मीननवांशे तन्नवांशपंचकार्श्वांक
चंद्रे भाद्रः मीननवांशे तन्नवांशपंचकोर्ध्वं मेषनवांशे तन्नवांशपार्श्वांकचंद्रेत्वाश्विनः अ
यमेषनवांशेतदंशद्वयकाद्यूर्ध्वं कार्त्तिकइति यस्मात्सर्वोक्तविधिनाकृत्तिकारोहिणी कार्त्तिकः
मृगोत्तमार्गः पुनर्वसुपुष्यौ पौषः सार्पमघे माघः पूर्वाद्वित्रयं फाल्गुनः त्रिभंपंचममित्
त्तिः चित्रास्वातीचैत्रः विशाखानुराधावैशाखः ज्येष्ठामूले ज्येष्ठः पूर्वोत्तराषाढेत्वाषा
ढः श्रवणधनिष्ठाश्रावणः शततारद्वित्रयं भाद्रः रेवत्याद्वित्रयमाश्विनः उपांत्यमंत्यं
चेत्सुकेः भुक्तौ सत्यमहणेनैतन्नताश्वयातिपतद्भुक्तपक्षांतेयेननक्षत्रेणयुक्तस्तदुपलक्षि
तोमासोवाच्यः यथाभुक्तपक्षांते कृत्तिकारोहिणी अन्यतमेनयुक्तेकार्त्तिकोमासः
एवमन्येपि पूर्वोक्तविधिनामासोज्ञेयाः मासस्तुकृष्णपक्षांत एवग्राह्याः नतुक्तं यद्वाशि एम

संस्थे शीतांशुः प्रश्नकाले नवांशके स्थितस्तद्राशिः पूर्वोक्तो यस्मिन्नुक्तिवंदमाः १ जन्ममासः समुनिर्दि-
ष्टः प्रश्नस्य तु पश्चतः प्रश्नप्रसांतिको मासो विज्ञेयो विपश्चितेति मासे ज्ञाते राशिज्ञानमाह ल-
ग्नेति प्रश्नलग्नस्य तस्मात् नवमपंचमयोर्मध्या उत्तमेनोत्कृष्टेन बलेन पूर्णं राशिं उच्यते लग्न-
त्रिकोणगृहयोर्बली तद्राशिगे चन्द्रे जन्म वाच्यमित्यर्थः तदुक्तम् होराप्रदीपे षोर्डाधिकवलान्भागी-
स्यानं त्रिकोणे शशिनो वधार्यमिति पश्चात्पातरमाह अंकेति अङ्कस्य रसनादिर्वा राशिर्ज्ञेयः
अयमर्थः कालांगानीत्यादिना कालनर उक्तः तत्र पृच्छा प्रश्नकाले शिर आदिपदं स्पृशति
तदङ्गसंबंधी चेद्राशिर्ज्ञेय इति आदिपदाद्राशिप्रोक्ता सत्वानां दर्शनश्रवणे गृह्यते ५ प्रकारा-
न्तरेण जन्मराशिज्ञानमाह यावदिति पृच्छालग्नाच्चन्द्रो यवक्रतः यावति राशौ स्थितः तावति
मेषराशौ चेद्यो ज्ञेयः एवं चंद्राज्जन्मराशिं वदेत् मीनेति मीनप्रश्नलग्ने मीनपूर्णं मीनराशिर्देवरो
यो न पूर्वोक्तः एवमनेकधा राशौ प्राप्ते विशेषमाह भस्येति भस्य राहूणेनाकारेकारेण कृतेन
शब्देन चिह्नं राशिर्विचार्यः अयमर्थः यद्राशेः संबंधि भस्य द्वयं तद्भस्य प्रयोजनमरोह-
श्यते आनीयते वा तद्राकारो वा दृश्यते तस्माद्राशौ शशी ज्ञेयो वा श्रूयते तद्राशिगे चन्द्रे जातो ज्ञेयः यथा मा एव-

ष॰ ज्यो॰ टी॰
८१

ज्योऽणद्विर्दशेनेसिंहः महिषाऽऽप्लवः इत्यादि ॥ एवं जन्मराशौ जाते लग्नमाह होरेति प्रश्नलग्ने यो नवांशस्तु
शस्तु स्य लग्नवाच्यं प्रश्नलग्ननवांशराशिरेव मित्यर्थः यद्यन्तरमाह लग्नात्प्रश्नलग्नद्रेष्काणाग्र
रश्मयावतियत्संख्ये द्रेष्काणे रविः स्थितः तस्माल्लग्नात्तावति तत्संख्ये राशौ प्रसूतः प्रसूतो जन्मनि ल
ग्नेवदेदिति शास्त्रं वदेत् नमयाक्लृप्तिमुच्यते इत्यर्थः द्रेष्काणगणनया त्र्यादशाधिके द्वादशभि
र्भागं हृत्वा शेषं संख्यया लग्नवाच्यं तदुक्तं प्रश्नलग्ननवांशस्य योपस्य हं तयाश्रमः तस्मिन् लग्न
गते राशौ वल्क्यं जन्मपृष्टतः यावत्संख्ये गते लग्नाद्रेष्काणे दिनकृन्मतः तावत्संख्ये गते राशौ
प्रश्नजन्म निनिर्दिशेदिति ॥ प्रकारान्तरेण लग्नानयनमिन्दुवज्रयाह जन्माद्दिशेदिति सलग्न
गते गृहेव हृतां लग्नगत्वेवलवतिलग्नगत्याभावे सर्वेषां बलवति ग्रहे छायांगुलसंगतौ द्वाद
शहृतशेषं जन्मलग्नं वृहेत अयमर्थः प्रश्नलग्नगते गृहे तावत्तत्कालिकं स्पष्टं कृत्वा
लिप्तापिण्डं संगुणयकुर्यात् ततः समभ्रमौ द्वादशाङ्गुलशङ्कुः संस्थाप्य तस्य छायापादं गुणि
ते लिप्तापिण्डं संगुण्य द्वादशभिर्भजेत् याबानांको वशिष्टस्तत्संख्यं मेषादि लग्नं तेषम् जन्मनि
इति प्रकारान्तरमाह आसीनेति आसीनसुप्तोत्थितत्तिष्ठतां च नुर्णां पृच्छकानां क्रमात् जाया ॥

रम॰
८१

सुखं ४ आशा १० उदय १ गं भं जन्मलग्नं प्रदिष्टं अयमर्थः उपविष्टं पृच्छति प्रश्नलग्नात्सप्तमे लग्ने ज
न्मलग्नं ज्ञेयम् शयने पृच्छति प्रश्नलग्नाच्चतुर्थं जन्मलग्नं ज्ञेयम् उत्थिते व्रजति पृच्छति प्रश्नल
ग्नाद्दशमं जन्मलग्नं तिष्ठति पृच्छके सति प्रश्नलग्नमेव जन्मलग्नमिति उक्तं च उत्तिष्ठो विल
ग्नात्स्पृष्टुः सुप्तस्य बंधुलग्नात् उपविष्टस्यास्तमये व्रजतो मेषूरणस्थानादिति ८ प्रकारान्तरेण
सर्वनष्टे जातके शार्दूलविक्रीडितेनाह गोसिंहाविति गोसिंहादयः प्रश्नलग्नगता लिप्तापिंडीकृतास्सं
तः क्रमात् दशकादिभिः रूकैः संवर्ग्या गणनीयाः शेषाः अनुक्तास्संख्येया गणनीयाः अयमर्थः
वृषसिंहौ प्रश्नलग्नगतौ सप्तौ लिप्ताः पिंडीकृतौ दशभिर्गुणयेत् मिथुनवृश्चिकावीदशो अथ
मभे मेषतुले सप्तभिः कन्यामकरौ पंचभिः कर्कश्चतुर्भिः धनुर्नवभिः मीनं द्वादशभिरिति
एवं राशीनां विधिर्निगदत उक्तः ग्रहयुते लग्ने तत्तद्वर्गेण ग्रहगुणना चक्रतेव्या तामेवाह
जीवेति गुरुभृगुकुजबुधाः प्रथमवत् दशकादिभिर्गुणयेत् अयमर्थः गुरौ लग्नगते तमेव
लग्नस्य गुणकाहतं दशभिर्गुणयेत् कुजे ऽष्टभिः भृगौ सप्तभिः बुधे पंचभिरिति शेषाण
हारपि चंद्रशनयः सौम्यवत् धवसंचभिर्गुणनीयाः इत्यर्थः बहुग्रहलग्नगेषु सर्वेषां गुणकैर्वे

लवत्क्रमात्कल्पयेत् एवं गणितांकं स्थापयेत् ९ तस्मान्नक्षत्रानयनं वसंततिलकेनाह तस्माह
तमिति शार्दूलस्यापि तोकः सप्तगुणं कार्यं तत्र नव देया नव शोध्या [illegible]पक्षा नव शोध्य नव देया इ
त्यर्थः अयमर्थः चरे लग्ने नव देयाः स्थिरे नव शोध्याः द्विस्वभावे नव देयाः नव शोध्याः केषां
चिन्मते लग्न प्रथम द्रेष्काणे नव देया द्वितीये नव शोध्या तृतीये उभयमिति एवं कृत्वा त्रिघ्ने
नव भक्ते त्रिंशत्या भक्ते अवाप्तं सप्तत्या शेषांके अश्विन्यादि जन्मभं ज्ञेयम् केषांचिन्मते सप्तविंश
तिभक्तानंतरं नव कृत्वा न शोध्या नेकं पर्येवमिति प्रश्नलग्नात्सप्तमादि राशिभ्यो लग्नवशेन
पृष्टु तेषां कलत्रादीनां जन्मभं देयं अयमर्थः यदा भार्यया न पृष्ट जातकं पृच्छति तदा तात्
कालिक लग्ने राशिवक्तृ ज्ञेयम् आतः प्रश्ने राशि द्वयं पुत्र पृष्टे चतुष्टयं रिपुन पृष्ट जातक प्र
श्ने राशि पंचकं लग्ने देयं एवं कृते तत्रोदय राशि परिकल्प्याः तद्द्वादश गुणाकारेण संगुणयः
तत्स्थ […] गुणाकारेणापि संगुण्य पन्नवकृत्वा न विशोधनेन कृत्वा सप्तविंशत्या विभज्य शेषां
कतुल्यं भार्यादीनां जन्मनक्षत्रं वाच्यं ११ कुम्पलग्नहारणं राशिभ्य प्रवृत्तं तात्कालिकलग्नात् मि
त्रस्यापि जन्मभं वाच्यं एवं शत्रोरपि तुरगवेरयमन्यस्यापि १० वर्षायानयनं वसंततिलकेनाह वर्षेर्गु एम०

मासेति एवं वर्षाद्यपः पुनर्दशादिभिर्गुणितानां नवकदानविशोधनाभ्यां च पूर्णाब्धविकल्पेन भुक्तासं
ज्ञो वर्षमासादयो जन्मनि अयमर्थः प्रश्नलग्ने लिखित्वा पिण्डीकृतं राशिगुणकारहृतं समलेनाहृ
गुणशारहृतं यत्स्थापितमक्षितस्थानचतुष्टयस्थाप्यकत्र दशभिर्द्वितीये ऽष्टभिस्तृतीये सप्त
भिश्चतुर्थे पंचभिर्गुणयेत् ततस्तस्मिन् राशिचतुष्टये पि नवकदानविशोधने प्राग्वत् उक्तौ वि
कल्पे भागमपहृत्य वर्षादयो ज्ञेया इति ॥ ११ ॥ तदेव वर्षाद्यानयनमनुष्टुभाह विज्ञेया इति दशके
ष्विति वहुत्वं वहुमोघ्यत्वात् वर्षर्तुमासा दशकेषु ज्ञेया पक्षतिथयो ऽष्टकेषु ज्ञेया अयमर्थः
दशगुणितं राशिं स्वविकल्पेन परमभागमपविशन्त्यधिकशतेन विभज्य यो विशिष्यते तावन्ति
एव वर्षाणि ज्ञेयानि तमेव राशिं विकल्प्य मनुसंख्यया विभक्तावशिष्टं मनुमनुमिति द्विधा
विभज्यो ऽवशेषे मनो प्रथमो मासः अन्ये द्वितीयः एवं कृत्वा दशगुणराशिरपाशनी
या साष्टषहतो राशिरेषं द्वाभ्यां विभज्ये ऽवशेषे शुक्लपक्षः अन्ये कृष्णपक्षः तमेव राशिं
तिथिसंख्यया पंचदशभिर्विभज्य शेषांक एव तिथयो ज्ञेयाः एवमष्टगुणो राशिरपास्यू १२
द्विवेति सप्तहतेऽवशिष्टो दिनानि सप्तवंनत्तन्न च ज्ञेयं तद्यथा सप्तहतराशिं द्वाभ्यां विभज्ये ऽवशेषे

दिने जन्मभं न्येतत्रो तमेव सप्तविंशतिवर्षाद्यंकं समं मश्विन्यादिनक्षत्रे वा कुर्यात्प्रयोगान् १३ न
क्षत्रस्य पुनरानयनं चाह वेलेति वेलात्पन होरेशात्पंचकोविघातं तद्यथा यद्दिने जन्मजातं त
द्दौवा तद्दिनं एकत्रिंशमाणं कृत्वा तेन नयं वा हृत्वा एकत्रिंशं वर्ज्यं वर्षाद्यंकं समे दिने सूर्ये ग्रहेषां वृषिकादिकाले
गते जन्म ज्ञेयम् एवं काले ज्ञाते एकपाद्दिलग्नं कार्यं तस्य च होराद्रेष्काणनवांशद्वादशांशाः कार्या उक्त
विधिद्वादश द्वादशवर्गी हेर्निर्देशेन कार्या एवं नष्टजातकं साधयेत् १४ अथ प्रकारान्तरेण नक्षत्रानयन
माह संस्कारेति संस्कारो नाम करणं तत्तत्फलं रसना तस्य या मात्रा ह्रस्वमेकोमात्राश्रिता दीर्घो द्विमात्रः
एवं गणनया या मात्रा लब्धा द्विगुणाः कृत्वा प्रश्नकालीनहोरांशा गुलशंकुछायांगुलसंख्यायुताः कार्याः
ततोऽस्मिन् वक्रे सप्तविंशत्या न्यामाना विभज्या वशिष्टांकं संख्यं धनिष्ठादिनक्षत्रं ज्ञेयम् १५ प्रकारान्तरेण
नक्षत्रमार्ययाह द्वित्रिचतुरिति बोध्यमनुदेशदशतिथयः पंचदशत्रिगुणा सप्तैकविंशतिनवअष्ट
ते ऽश्विन्याद्याः क्रमाद्दिग्दशमंकास्तेषाः अथ मथ्याः एकादिमुखे पृच्छके पृच्छति सति वा एकोऽश्व्यायोऽस्मि अग्ने
याभिमुखे पृच्छति ग्योंका ग्नाह्याः एवं दिगभिमुखे पृच्छकस्य शोनोऽक माहाय पंचदशगुणिताः कार्याः तदि
ग्भवाग्निमग्ने तस्य यस्मिन्तदिङ्मुखः प्रश्नो वा दिगभिमुखः तद्दिङ्मुखवाया वंते नगस्त तत्संख्यया पूतः
कार्याः एवं कृते योऽङ्कः स्यात्सप्तविंशत्या हृत्वाऽवशिष्टांकसमं धनिष्ठादितो जन्मनक्षत्रं वाच्यं १६ नष्टजा एस॰

तकोसंहारमाष्यपाह इतीति इति नष्टशब्दसंसारएवनष्टजातकंमिदंनाना विधीयुक्तंसमीचीनमिष्येतले
नपरिछुपयाभवतिसत्यंचदति। तथानोअस्मानमुक्तितोमाहां २७ इतिश्रीमहीधरकृतेवृहज्जातकेवि
वरणेनष्टजातकाध्यायश्चतुर्विंशः॥२४ अथद्रेष्काणाध्यायः तत्रमेषद्रेष्काणस्वरूपंवैतालीयेनाह के
घामिति यदिनेसेतुमंवरं वेष्टितं येन संस्थाप्यवर्णमभिमुखं नरः शौकृष्णमथं च भीषणः लोहितनेत्रोनरः
उच्छ्रितं कुठारं धरति एवनरद्रेष्काणसवुधः कपस्तलक्षणं १ मेषद्वितीयाचस्वरूपमिन्द्रवज्रयाह रक्ताम्बरेति॥
लोहितवस्त्रालंकारेभोज्येचमनोयस्यासाघटोदरी अश्ववदनापिपासिताएकचरणेनाश्रपसंक्षितः अथमे
षद्वितीयद्रेष्काणेयवनैरुक्तः येचतुः सद्रेष्काणस्त्रीद्रेष्काणे अशक २ मेषतृतीयस्वरूपमाह क्रूरइति
विषमस्वभावः कलाचतुरः पिंगलः कर्माभिलाषुकः स्खलितनियमः अभिमुखेनोद्यतदण्डः पाणौयस्य
रक्तवस्त्रधरः क्रोधनः ईदृशो मेषतृतीयः एकसाधोनरेन्द्रेः काणोजीवशलक्षण ३ वृषप्रथमंदोधकेनाह कु
चितेति कुटिलाः कल्पिताः केशा यस्यासा कुंभोदरीदग्धवस्त्रापिपासुः भोजने चिंता यस्यासाभूषणोत्सुः
एव स्त्रीद्रेष्काणः सात्त्विकः भृगुसलक्षण ४ वृषद्वितीयाप्रागतयाह क्षेत्रेति क्षेत्रेषुसस्यादिषुवेशस
मुधेनुषुनृत्यगीतवाद्यतयादिकुशलः हलेकृषः प्रवीणः वृषस्कंधः वुभुक्षुः छागमुखः मलिनांबरः
प्रेष्यतुष्यद्रेष्काणः वुधसलक्षण ५ वृषतृतीयंमौक्तिकमालयाह द्विपेति महाशरीरः नतुहस्ति वपुः

श्वेतदंतः बृहत्पादः नृत्वष्टापदचरणः कपिलाङ्गः अवीनां मृगाणां लोमार्पैव्यग्रं चित्तं यस्य सः मेषतुलद्रेः काणेस
विसक्तः ९ मिथुनाद्यं वसन्ततिलकेनाह सूच्येति सूच्याश्रितं कर्म सीवनक्रिया तामिच्छतीति सूच्याभूषणकार्येकृतप्रव
लाअनपत्या ऊर्ध्वबाहुः रजस्वला एषः स्त्रीद्रेष्काणो बुधसक्तश्च ७ मिथुनद्वितीयमुपजात्याह उद्यानेति
उपवनस्थः सर्वतनुत्राणधरः रणप्रियः शास्त्रधृतो गरुडवक्त्रः क्रीडापत्यभूषणेषु वर्धेच वित्तं यस्य
एषउग्रतापुधः खगोनरः शुक्रसक्तः ८ मिथुनतृतीयस्वागतयाह भूषितेति अलंकृतः समुद्रवत्प्रभूतमणिः
रत्नधिधारी चापधरः नृत्यवाद्यवादित्रे चित्रादिकलासु कुशलः कवितृत्वसः एषनरद्रेष्काणः सापुधः शनि
शक्तः ९ कर्कषं स्वागतयाह पत्रेति पत्राणि मूलानि च धरतीति गजशरीरः वने चंदनवृक्षगतिः सा
मनुल्यपादः शूकरमुखः अश्वग्रीवः एषमनुष्यादद्रेष्काणः नरचन्द्रसक्तः १० कर्कद्वितीयमिन्द्रवज्र
याह पद्मार्चितेति नारीणिरसिकमले वृजिनाप्सर्पबनाकठिनांगीयौवने पुनसूर्पा वनेशाक्रोशलपर
भाशनरुशारवासक्ता एष स्त्रीद्रेष्काणो भौमसक्तः ११ कर्कतृतीयं वैतालीयेनाह भार्येति जायायाअ
लंकारनिमित्तं समुद्रेनाप्यगतः भुजगोवक्ता गोयातिकनकाभरणाविचिपिटमुखः एषनरोव्यालोगुरु
शक्तः १२ सिंहाद्यं रथोद्धतयाह शाल्मलेति मृगालः सारमेयः मलिनवस्त्रो जनकजननीविहीनस्त्र
शाल्मलितरुपरि क्रोशतएषद्रेष्काणः नरखगचतुष्पदस्वाः सूर्यसक्तः १३ सिंहद्वितीयंवंशस्थेनाह तया एम॰

कलशमिति तुरगाकारः नरपो तुरगोत्तमधारी चापमसगत्यं चडर्गांच धरति काशीचद्रः साध्यो गृहीतधनुः न
मनास्विकाग्रः एषनरचतुष्पदः कुजासक्तः १४ सिंहतृतीयमुपजात्याह ऋक्षेति भल्लूकमुखः कपित्व
भावः आयुधारिफलंमांसंचधारयतिकुंचितकेशो रूपलक्षितोनरः एषनरचतुष्पदः कुजासक्तः १५
कन्याद्यमुपजात्याह पुष्पेति कुसुमपूरकुम्भेनोपलक्षितः मलिनवस्त्रवेष्टितशरीरा वालोऽव्ययोगंधा वं
धमिच्छतिगुरोकुलोषिणी कन्या एषः स्त्रीद्रेःकाणो बुधासक्तः १६ कन्याद्वितीयमुपजात्याह पुरुषद्
ति पयांसुपरिलिखन्तेसाले खनीगृहीता येनसः रूपवर्णः पटवेष्टितमस्तकः दीर्घधनुर्विभर्तिए
षनरद्रेष्काणः साधुधः शनिशक्तः १७ कन्यातृतीयमुपजात्याह गौरीति गौरवर्णः दुकूलहस्ते पिपा
ठः उच्चावटहर्षीयुतपाणिः सुरगृहंगन्तुमुपता समाहिता ईदृशी नारी एषद्रेःकाणः भक्रशक्तः १८
तुलाद्यं वंशस्थेनाह वीथ्यंचितेति लोमशोगमकरतुल्यपृष्ठः वराहतुल्यदेहः योऽर्कं वृषभयोर्जनज
लकं पक्षिग्राहकं दृष्ट्वा वीथ्यान्तरे इति घटसहितउन्माने ऊर्ध्वमाने तुलाहोमाने निपणनेकुर्या
दो द्रवीणः एषनरद्रेःकाणः भक्रशक्तः १९ तुलाद्वितीयमाह कलशमिति तुलामध्यएयान एपतः
क्षुधान्वतो मयपत्रो श्च मनसापा तिस्मरति मधास्य एषनेरद्रेःकाणः शनिसक्तः २० तुला

तृतीयद्रेष्काणस्येनाह विभीषयन्निति मणिभूषितसुवर्णपुष्पधारी स्वर्णकवचधारी धनभल एषवान
राकारोनरश्चतुष्पदसायुधश्चसक्तः २१ वृश्चिकाद्यमपजात्याह वस्त्रैरिति वासोभिर्भूषणैश्च हीनास्था
नभ्रष्टः २२ वृश्चिकद्वितीयद्रेष्काणमाह स्थानेति सर्पाच्छादिताङ्गी कूर्म्मघटदेहानारी पतिनिमित्तं स्था
नसुखानिच्छति २३ वृश्चिकतृतीयं पुष्पिताग्रयाह पृथुलेति एषनरचतुष्पदद्रेष्काण एवं चेदस
तः २४ धनुःप्रथमिन्द्रवज्रयाह मनुष्येति नराःननस्तुरगसदृशदेहश्चतपस्विनामाश्रमग
तः एषनरचतुष्पदद्रेष्काणः सायुधोगृहसक्तः २५ धनुर्द्वितीयमपजात्याह मनोरमेति चित्ता
न्नोदकारी चम्पकपुष्पैः कनकेन चतुल्यद्युतिर्नातिशोभना २६ धनुस्तृतीयमाह कूर्चेति दीर्घ
श्मश्रुसुवर्णचम्पकपुष्पसमकान्तिः सिंहासनोदण्डहस्तो नरो दुकूलमृगचर्म्मणी उद्वहते २७
मकराद्यं द्रेष्काणमाह रोमचितइति लोमशोङ्गमकरतुल्यदंष्ट्रः वराहतुल्यदेहः योक्त्रं वृषभयोज
नेजलकंपाशिनमाहकं २८ मकरद्वितीयमपजात्याह कलास्विति नृत्यादिकला प्रवीणापद्मप
त्रनेत्रा श्यामवर्णा नानावस्तूनि वेषयन्ति आभरणैः शोभिता २९ मकरतृतीयं रथोद्धतयाह कि
न्नरइति देवयोनिसमाङ्गः कम्बलयुतः इषुधिधनुर्वर्म्म सहितो नरो मणिभविभूषितं भाण्डं घ
टं धारयति एषनरद्रेष्काणः सायुधोबद्धसक्तः ३० कुम्भाद्यमाह स्नेहेति स्नेहतैलजलपानीयाध्या

नानोपव्यग्रं चित्तं यस्य सः दुकूलवासा मृगचर्मयुतः मधुपक्षिसमास्यः एष द्रेष्काणः खगः शनिश
कः ३१ कुंभद्वितीयं वैतालीयेनाह दग्धेति मलिनसोवरणस्तकापेप्सितभाण्डावन्हिरुध्येशाल्मलि
तरुपते शकटे स्थितास्त्री भरणे लोहानि नयति एषः स्त्री द्रेष्काणः सन्निको बुधसक्तः ३२ कुंभत
तीयमिंद्रवज्रयाह श्यामइति कृष्णवर्णः लोमशकर्णो मौलियुतो नरः त्वक्चर्मपत्राणि दलानि
निर्यासो वृक्षरसो गुग्गुलादि फलान्यम्रादि एतैः सह लोहपुतानि पत्राणि धारयति तानि चेतस्तश्चा
लयति स्थानांतरे नयतीत्यर्थः एष द्रेष्काणः शुक्रसक्तः ३३ मीनाद्यमाह समुद्रइति यन्नोपक
रणपात्रैः मुक्ताफलैः रत्नैः शंखैश्चैकीकृते व्यग्रहस्तः आभरणयुतो नरः स्त्रीणां भूषणानिमि
त्तं नावारूढ्वा समुद्रं गच्छति एष नरद्रेष्काणः गुरुशक्तः ३४ मीनद्वितीयं वसन्ततिलकयाह अत्यु
च्छ्रितेति वर्णेन कान्त्या चंपककुसुमं मुख्याति तिरस्करोति चम्पकमुखी कनकवर्णा मुखी युतः समु
द्रस्य तटं प्रयाति एषः स्त्री द्रेष्काणश्चन्द्रसक्तः ३५ मीनतृतीये द्रेष्काणस्वरूपं श्वभ्रांतिक इति॥
भुजगावृतदेहो नग्नस्तः स्करः वन्हिव्याकुलचित्तो नरो वने गतः समीपे व्यालद्रेष्काणः कुजशक्तः
द्रेष्काणस्य प्रयोजनं श्यपाले प्रोक्तं अपि पाशे इति प्रश्ने चौरं तानंग शकात्तापते द्रष्यं द्रेष्काणो भक्त

रामत्तिः राशिभ्यः कालदिग्देशावर्णा जातिप्ररा शिपादिनि २६ इतिश्रीबृहज्जातकेटीकायांमहीधर
कृतेद्रेष्काणाध्यायः पंचविंशतिमः २५ अथोपसंहाराध्यायः तत्राकविः पित्रादिनामानि वसन्तति
लकेनाह आदित्येति आदित्यदासनाम्नोविप्रस्यपुत्रस्यपुत्रस्तस्मादादित्यदासादेवप्राप्तज्ञानः कपि
त्थाख्येग्रामेयः सविताररविस्तदाराधनेनतस्मात्प्राप्तोवररूपः प्रसादोयेनसः आवंतिकउज्जयिना
वासीवराहमिहरः शाप्यौमुनिमतानिऋषिप्रणीतशास्त्राणिसम्यक्संप्रदायेनविचार्यशो
भनंहोरांजातकशास्त्रंकृतवान् १ अध्यायसंग्रहमुपजात्याह राशीति राशिप्रभेदाऽध्याय
प्रथमः १ ग्रहयोनिभेदाद्वितीयः २ वियोनिजन्माध्यायस्तृतीयः ३ निषेकाध्यायश्चतुर्थः ४ ज
न्माध्यायःपंचमः ५ अरिष्टाध्यायःषष्ठः ६ आयुर्दायाध्यायःसप्तमः ७ दशाऽध्यायोऽष्टमः ८ अ
ष्टकवर्गो ९ २शेषाणांसंज्ञा शालिनीच्छन्दसाह कर्मेति कर्मजीवोदशमः १० राजयोगएकादशः ११ नाभसयो
गोद्वादशः १२ चंद्रयोगस्त्रयोदशः १३ द्विग्रहयोगश्चतुर्दशः १४ राशिशीलंपंचदशः १५ प्रव्रज्याषोडशः १६
दृष्टिफलंसप्तदशः १७ भावाध्यायः अष्टादशः १८ आश्रयाध्यायएकोनविंशः १९ प्रकीर्णोविंशः २० नेष्टाति आ
ध्यष्टयोगएकविंशः २१ स्त्रीजातकोद्वाविंशः २२ निर्याणंत्रयोविंशः २३ नष्टजन्मचतुर्विंशः २४ द्रेष्काणाप

चविंशः २५ ४ एवं जन्मनि जातके पंचविंशतिरध्यायः २५ इदानीं यामित्रयोगजाशयं निषेधमध्यायं संग्रहमहं
कथयिष्ये तद्देयम जाति त्रयेगोरह प्रश्न इति प्रश्नाऽध्यायः तिथिभावाऽध्यायः नक्षत्रं दिवसो वारफलं मुहूर्ता
ध्यायः चन्द्रफलं लग्ननिश्चयः लग्नमेषहोराद्रेष्काणोदयः ग्रहाणां शुद्धिः कुंडलिफलं अपवादश्च अध्यायः मि
श्रकाध्यायः अंकस्फुरणं १ अंक इति गुह्यकार्चनं स्वप्नाध्यायः स्नानविधिः गृहनक्षत्राः प्रस्थाने शकुनाध्यायः
२ विवाहेति विवाहकालः गृहस्पष्टा एवं ज्योतिर्विद्धा हितायत्रिभिः स्कंधैर्गणितहोरासंहिताख्यैः रयं मयाम्नो
तिः शास्त्रं संग्रहो रचितः ३ संक्षयकरणं मालिन्यात् ह्यथितए नस्सकलं शास्त्रमन्यैराचार्यैः विस्तीर्णीकृतं
तदेतन्मयाऽल्पमपकृतं क्षीडे शोनस्त्रचेतसा पूर्वैराचार्यैः कृष्णादिष्वर्था यत्र तत्रास्येषमया यत्तद्गुरुकं अग्रभंग
कृतं त्यागिडतैः तत्पूर्ता ४ सतां प्रार्थनं वसन्ततिलकेनाह ग्रंथस्येति प्रचरणं स्यादस्य ग्रंथस्य जातस्य वा
वैलकरो यान्न भूपतियद्यामपात्रपतत् कुत्सितं कृतं अल्पं वा कृतं कर्तव्यं न कृतं यान्तं तत्र बहुभुतेनापण्डिता
नाम्मुख्यात् योऽधिगमो ज्ञानं तत्त्वपरिपाठ्या विदुषा मत्सरं विहाय कार्यमनघे पोन नाशनीयः साधनीयश्चेत्य
र्थः शास्त्रावसाने सततोननि प्रार्थयाह दिनकरेति रवेर्वशिष्ठादिमुनीनामादित्यदासस्य चरणेन स्याकृ
तः प्रसादेनेर्मल्यं पप्पाईदशोमक्षिर्पस्यते न मयेशास्त्रं उपस्थितं तस्मात्सूर्यप्रणीतेभ्यः पूर्वशास्त्रकर्तृभ्यो
नतिरस्तु ५ इति श्रीमहीधरकृते बृहज्जातकविवरणे उपसंहाराध्यायः षड्विंशः २६ एवमेत्रेषु १५२० गीता
शके वितीते सहो मासि धातुस्थिते सोमवारे महीदासविप्रा मछेशानुपूर्व्या बृहज्जातके टिप्पणं संप्रधा

वृ॰ जा॰ टी॰
८३

द्वि १ नयननन्दवसुभूमि १८९२ तवत्सर प्रतिपदीज्यदिने भरणीयुते अचलनामधरो लिखति स्मतस्त
हसि मासि वराहविनिर्मितम् १ आदित्यदाससतनयस्तदवाप्तबोधः कापित्थके शवितलब्धवरप्रसादः
आवंतिको मुनिमतान्यवलोक्य सम्यक् होरां वराहमिहिरो रुचिरां चकार श्रीसम्वत् १९०९ शाके १७७४
लिखितं जोवेलालेन श्री मन्यशिधाज पोथी मुरलीधरस्यार्थम् ग्रंथसंख्या टीका २६०० बृहज्जातके

८म

८३